प्रबोधचन्द्रोदयः प्रकाशाभि
धव्याख्यासहितः

३१२

७६ पत्राणि

नं० ६१ घ
प्रबोधचन्द्रोदय प्रकाश ह०
६१ पत्राणि
नाटक है
टीका-टिप्पणी : रामदास ह०.

८५ पाठकोपनामकरामचंद्रस्येदंपुस्तकं ०

प्र० बे०
१

श्रीगणेशायनमः॥ रामं विनायकं वंदे सदानंदं गुणाकरं। संसारतापसंहारकारणं विघ्नवारणं॥१॥ अथ कृष्णमिश्रेण वेदांतसिद्धांतमपि तत्राव बोधपराङ्मुखं नाटकादिरसिकं परमकारुणिकाः श्रीकृष्णमिश्राः प्रबोधचंद्रोदयाख्यनाटकव्याजेन तं बोध
विषयवस्तु दर्चयंति स्म। तत्रादौ पद्यद्वयेन नांदीसंज्ञकेन निर्विघ्नपरिसमाप्तये कृतं मंगलं निबध्नंति नांदीसंज्ञकं श्लोकद्वयं तत्र नांदीस्वरूपं॥
= न दा ५ तं दर्शयति काव्यानिक वींद्र वर्णाः कुशीलवाः पारिषदाश्च संतः। यस्मादलं सज्जनसिंधुहंसी तस्मादियं सा कथितेति नांदी॥ इति नांदीस्वरूपं तल्लक्षणं च॥ आ
शीर्नमस्क्रियावस्तुश्लोकः काव्यार्थसूचकः॥ नांदीति गद्यते देव पदैर्द्वादशभिस्तथेति नांदीस्वरूपलक्षणलक्षितमाद्यपद्यद्वयं तत्राद्यं पद्यं व्या

मध्याह्नार्कमरीचिकास्विव पयःपूरो यदज्ञानतः खं वायुर्ज्वलनो जलं क्षितिरिति त्रैलोक्यमुन्मीलति। य
त्तत्त्वं विदुषां निमीलति पुनः स्रग्भोगिभोगोपमं सांद्रानंदमुपास्महे तदमलं स्वात्मावबोधं महः॥१॥

ख्यायते। मध्याह्नेति। वयं तदौपनिषदं महस्तेज उपास्महे सेवयामः। कीदृशं महः॥ सांद्रानंदं सांद्रो निबिडो निरुपाय आनंदस्तद्रूपं॥ पुनः कीदृशं महः॥ अम
लं अविद्यातत्कार्यादिदोषशून्यं॥ पुनः कीदृशं॥ स्वात्मावबोधं स्वात्मैव स्वस्वरूपमेवावबोधः प्रकाशो यस्य स्वप्रकाशमित्यर्थः। तत्किं यदज्ञानतो यस्मा
ज्ज्ञानादिति रिदं त्रैलोक्यमुन्मीलति प्रादुर्भवति। किं तत्राह। खमित्यादि। अज्ञानात्प्रपंचोत्पत्तौ लोकदृष्टांतेनाह। मध्याह्नार्कमरीचिकासु पयः
पूर इवायथा मध्याह्ने सिकतादिप्रतिफलितेषु अर्ककिरणेषु तद्विषयाज्ञानात्पयःपूरस्तथा जायते तथा सच्चिदानंदादिरूपब्रह्माज्ञानात्प्रपंच राम
उत्पन्न इत्यर्थः। एवं चेत्कथमनर्थनिवृत्तिरित्याशंक्य सदृष्टांतमाह। यत्तत्त्वं यस्य त्रैलोक्यस्य तात्त्विकं स्वरूपं विदुषां ज्ञानिनां पुनर्निमीलति नश्यति १
आत्मस्वरूपातिरिक्तं न भवति किंतु ब्रह्मस्वरूपेणेति॥

ष्ठतीत्यर्थः। तत्र दृष्टांतः स्रग्भोगिभोगोपमं स्रजि मालायामुत्पन्नो यो भोगिभोगः सर्पदेहस्तेनोपमेयं तथा चापमर्थो मालानवसाक्षात्काराच्छि
द्भिन्नः सर्पदेहो न भवति किंतु तत्स्वरूपेणावतिष्ठते। एवं ब्रह्मादैतसाक्षात्कारात् स्वरूपातिरिक्तरूपेण प्रपंचो न तिष्ठतीति। एवं च समस्तज्ञाननि
॥४५३ वृत्तिः प्रयोजनं। प्रयोजनकामोधिकारी। प्रतिपाद्यप्रतिपादकभावः संबंधः। एकमभिधेयमित्यादि प्रदर्शितं १ अपि चेति प्रारब्धमंगलस
समुच्चयार्थः शब्दः। अंतरिति। चंद्रार्द्धमौलेश्चंद्रशेखरस्य प्रत्यक् ज्योतिर्जजन्ताहंकारादिभ्यः प्रातिकूल्येन सत्यज्ञानानंदादिरूप
त्वेनांचति प्रकाशते तत्तस्य हृतत्वत तज्ज्योतिश्च प्रकाशरूपं जयति जयः सर्वोत्कर्षो ऽन्यनिरपेक्षतेत्यर्थः। कीदृशं प्रत्यग्ज्योतिः। अंत

अपि च। अंतर्नाडीनियमितमरुल्लंघितब्रह्मरंध्रं स्वांते शांतिप्रपायिनि समुन्मीलदानंदसांद्रं। प्रत्यक्ज्यो
तिर्जयति यमिनः स्पष्टलालाटनेत्रव्याजव्यक्तीकृतमिव जगद्व्यापि चंद्रार्द्धमौलेः २ श्रीकृष्ण

नाड्यां सुषुम्नायां नियमितः सन्निरुद्धश्वासो मरुच्च तेन लंघितमुल्लंघितं ब्रह्मरंध्रं येन तत्तस्मिन्सति। स्वांते अंतःकरणे शांतिप्रपा
यिनि उपशमं गते सति। पुनः कीदृशं ज्योतिः समुन्मीलन्प्रकटीभवन्नानंदः सुखं तेन सांद्रमभिन्नं स्वप्रकाशसुखाभिन्नमित्यर्थः।
कीदृशस्य चंद्रार्द्धमौलेर्यमिनः यमोस्यास्तीति यमी तस्य योगासक्तस्येत्यर्थः उत्प्रेक्षते। कीदृशमिव ज्योतिः। स्पष्टं प्रकटं ललाट
संबंधि लालाटं नेत्रं तृतीयं चक्षुस्तद्व्याजेन तन्मिषेणाव्यक्तं व्यक्तं संपन्नं तथाभूतं व्यक्तीकृतं प्रकटीकृतमिव पुनः कीदृशं जगद्व्यापि
जगद्व्याप्नोति विषयीकरोति तत्तथा। श्रीमद्भगवच्चक्षु उत्प्रेक्षातीवसमीचीनेति हृदयं। अनेनाद्यपद्यद्वयेन वेदांतसिद्धांतरहस्यं प्रकटयतामि

४५१

श्रेणामिधेयं निरणायि ८।

४× आदिष्टोस्मीति॥ आदिष्टोस्मि आज्ञप्तोस्मि गोपालेनेत्यन्वयः॥ कीदृशेन गोपालेन॥ श्रीमता लक्ष्मीवता॥ लक्ष्मीवतश्चा शोभ्यवश्यं विधेयेति भावः×४

नांद्याभिनयेन कथां प्रस्तावयति। नांद्यंते सूत्रधार इति। नांदी नाटकादौ पद्यादिरूपा। सूत्रधारो नाटकाचार्यः। वक्ष्यतीति शेषः। तल्लक्षणं
=वाद्य२ तु। चतुरातोद्याभिज्ञातो नेकभूषासमावृतः॥ नानाभाषणतत्त्वज्ञो नाथशास्त्रार्थतत्त्ववित्॥१॥ नानागतिप्रचारज्ञो रसभाव विशारदः।
वेषोपचारचतुरो नानाशिल्पिकलान्वितः॥२॥ छंदोविधानतत्त्वज्ञः सर्वशास्त्रविचक्षणः। तत्तद्गीताद्यभिनयकलातालावधारणः॥
अवधायप्रयोक्ता चयोक्तॄणीमुपदेशकः। एवंगुणगुणोपेतः सूत्रधारोभिधीयते इति॥ अलमिति नांदीपाठेनेव समयो ननेत व्यरति भावः॥ पु
नः कीदृशेन। सकलाः सर्वे ये सामंता मंडलेश्वरास्तेषां चक्रं समूहः तस्य चूडामणयो मुकुटमणयस्तेषां मरीचिर्मंजर्यः किरणपरंपरास्ताभिर्नी

नांद्यंते सूत्रधारः। अलमतिविस्तरेण॥ आदिष्टोस्मि। सकलसामंतचक्रचूडामणिमरीचिमंजरीनीराजितचरणकमलेन। बलव
द्रिपुवक्षःस्तटकपाटपाटनप्रकटितनरसिंहरूपेण। प्रबलतरनरपतिकुलप्रलयमहार्णवमग्नमेदिनीसमुद्धरणमहावराहे
४ ण। निखिलदिग्विलासिनीकर्णपूरीकृतकीर्तिलतापल्लवेन। समस्ताशास्तंबेरमकर्णतालास्फालनबहलपवनसंपातनर्ती
तप्रतापानलेन श्रीमता गोपालेन॥ ॥

राजितं चरणकमलं यस्य तादृशेन। पुनः कीदृशेन। बलवंतो ये अरिपुं आ शत्रुसमाजास्तेषां वक्षःस्तटमेव कपाटं तस्य पाटने विदारणे प्रकटि
तं नरसिंहरूपं येन। पुनः कीदृशेन। प्रबलतरा लियानि नरपतिकुलानि तेषां प्रलयो विनाशः स एव महार्णवः तस्मिन्मग्ना या मेदिनी तस्याः स
मुद्धरणे वराह इव वराहस्तेन। पुनः निखिलाः समस्ता दिग्रूपा विलासिन्यो वारांगनाः तासां कर्णपूरः अकर्णपूरः कर्णपूरः संपन्नस्तथा
कृतः कर्णपूरीकृतः श्रवणालंकारीकृतः कीर्तिलतापल्लवो येन। एतेन दिगंतविश्रांतकीर्तिसंध्वनितं। पुनः कीदृशेन। समस्ता ये आशास्तंबे
रमाः दिग्गजास्तेषां कर्णतालास्फालनेन बहलतरो यः पवनसंपातस्तेन नर्तितः प्रतापरूपो नलो यस्य तादृशेन। अनेन दिगंतविश्रांतप्रताप
इति ध्वनितं। आसन्नोस्मीत्युक्तं तामाज्ञामेव दर्शयति पश्येति॥ २

खलुप्रसिद्धौ अस्य सहजसुहृदः स्वभावकोमलस्य श्रीकीर्त्तिवर्मदेवनाम्नो राज्ञः कीर्त्तिरिवकैरवचंयस्येतिवा तस्य यो दिग्विजयस्तद्व्यापारेणांत ×वर्म१
रितो विलंबितः परब्रह्मानंदरसो येषां तादृशैरस्माभिः सम्यगुन्मीलिताः सम्यगनुभूता विविधा अनेकप्रकारा विषयाः स्रगादयस्तेषां रसस्पर्शो
न आनंदानुभवेन दूषिता रवविषय सुखस्पृहेपला दिवसा अतिवाहिता अतिक्रांताः कृत्यकृत्यतां दर्शयति पवरति नीता इति। नृपतेर्विव
क्षावैरिणः क्षितिभुजो भूमिपालाः क्षयं मिताः प्रापिताः। प्रथितैः रव्यातैरमात्यैर्मंत्रिभिः क्षितिः रक्षावती अभूत्। अस्य नृपतेर्भुवि साम्राज्यं

यथा खल्वस्य सहजसुहृदो राज्ञः श्रीकीर्त्तिवर्मदेवस्य दिग्विजयव्यापांतरितपरब्रह्मानंदरसैरस्माभिः समुन्मीलितविविधविषयर
×तिवा२ सस्पर्शदूषिताश्च वाहिता दिवसाः इदानीं तु कृतकृत्यावयं यतः। नीताः क्षयं क्षितिभुजो नृपतेर्विपक्षा रक्षावती क्षितिरभूत्प्रथितैरमात्यैः। सा
म्राज्यमस्य विहितं क्षितिपालमौलिमालार्चितं भुवि पयोनिधिमेखलायां॥ तदधुना शांतरसप्रायप्रयोगाभिनयेनात्मानं विनोदयितुमिच्छामः॥
तथा पूर्वं तत्र भवद्भिः कृष्णमिश्रैः प्रबोधचंद्रोदयं नाम नाटकं निर्माय भवतः समर्पितमासीत्। तदद्य राज्ञः श्रीकीर्त्तिवर्मणः पुरस्ताद
भिनेतव्यं भवतास्ति चास्य भूपतेः परिषदस्तदवलोकनकुतूहलमिति। तद्भवतु गृहं गत्वा गृहिणीमाहूय संगीतकमनुतिष्ठामि। परि
क्रम्य नेपथ्याभिमुखमवलोक्य। आर्ये इतस्तावत् प्रविश्य नटी एसह्मि आणवेदु अज्जउत्तो को णिओ अणुचिट्ठीयदु त्ति। सूत्रधारः। आ
र्ये विदितमेव भवत्याः॥ ७॥

विहितं कृतं कीदृशं क्षितिपालानां मौलिमालामुकुटश्रेणयस्ताभिरर्चितं पूजितं कीदृश्यां भुवि पयोनिधयः सागरा एव मेखला परिखा यस्यां
सां कृतं कृतकृत्यताप्रयोजनमाह। तदधुनेत्यादि। शांतरसप्रायः शांतरसप्रधानो यः प्रयोगाभिनयो नाट्यानुकारस्तेन तत्पूर्वः। आत्मविनोदोपायमाह तं
यदिति। तत्र भवद्भिः पूज्यैस्तत्रभवत्तत्रभवद्भ्यो पूज्यार्थौ परिक्रम्येसं तं सुगमं नेपथ्यं नांघाः पाठायवर्दवंधो वा प्रविश्य नटीति वदतीति शेषः॥
एषास्मि आणापय [illegible] वार्यपुत्रः को नियोगोनुष्ठीयतामिति। १ × नेपथ्याभिमुखेति पदप्रविष्टमेव जवनिकांतरे वदति तन्नेपथ्यशब्देनोच्यते ×

× सपरिषदस्सभासहितस्य तदवलोकनेत्यादि ×२

×त्त२

कथंचिदित्यमित्याह। अस्तीति। गोपालोऽस्तीतियोजना। कीदृशो गोपालः॥ प्रत्यर्थिनो रिपवो ये पृथ्वीपतयस्तेषां विपुलं बहलं बलं सैन्यं तदेवारण्यं तस्मि ×त२
×न्न२ न्मूर्छ्छितं वृद्धिं प्राप्नुवन्यः प्रतापः स एव ज्योतिर्ज्वालयाऽवलीढमाक्रमितं त्रिभुवनविवरं येन सः। पुनः। विश्वस्मिन्विश्रांता विख्याता कीर्त्तिर्यस्य सः॥
३ येन कीर्त्तिवर्मनरपतितिलको भूपः साम्राज्येऽभ्यषेचि अभिषिक्तः॥ किं कृत्वा॥ असिलतेव खड्ग एव मित्रं सहायस्तन्मात्रेण भूमिपालान्नृपान्प्रसभं हठेन ×ह्ये३
=कर्मा४ जित्वा खड्ग एव तस्य सहायो नान्य इत्यर्थः। तस्य कीर्त्तिमितरमप्याह। अपि चेति। अद्यापीति। रणक्षोणयः संग्रामभूमयः विततैर्विस्तृतैर्नादैः शब्दै

अस्ति प्रत्यर्थिपृथ्वीपतिविपुलबलारण्यमूर्छत्प्रतापज्योतिर्ज्वालावलीढत्रिभुवनविवरो विश्वविश्रांतकीर्तिः। गोपालो
भूमिपालान्प्रसभमसिलतामित्रमात्रेण जित्वा साम्राज्ये कीर्त्तिवर्मनरपतितिलको येन भूयोऽभ्यषेचि॥ ४ अपि च। अद्याप्यु
न्मद्यात्तुधानतरुणीचंचत्कराऽऽस्फालनव्यावल्गन्नृकपालतालरणितैर्नृत्यत्पिशाचांगनाः। उद्गायंति यशांसि यस्य विततैर्ना
दैः प्रचंडानिलप्रक्षुभ्यत्करिकुंभकूटकुहरव्यक्तै रणक्षोणयः॥ ५॥

रद्यापि इदानीमपि यस्य यशांसि उद्गायंति। कीदृशैर्नादैः। प्रचंडानिलेन महावायुना प्रक्षुभ्यंतो ये करिणस्तेषां कुंभाः गंडस्थलानि
तेषां कूटं समूहस्तस्य कुहराणि बिलानि तेषु व्यक्तैः प्रकटैः। वायुपूर्णानि हस्तिकुंभस्थलानि शुष्कानि ध्वनंतीति भावः। पुनः कीदृशैः॥
=क्रैटर उन्मदा उत्कृष्टमदयुक्ता या यातुधानतरुण्यः राक्षसस्त्रियस्तासां चंचंतो दीप्तिमंतो ये करास्तेषामास्फालनं परस्पराघातः करता
लिकारूपस्तेन व्यावल्गंति चपलानि यानि नृकपालानि तान्येव तालाः वाद्यविशेषास्तेषां रणितानि शब्दितानि येषु। कीदृश्यो रणक्षो ३
णयः। नृत्यंत्यः पिशाचांगना यासु ताः॥ श्रीकृष्ण॥ ॥ ॥ ५॥

१=प्रदर्शयितुं=२

एतावताकिंस्यात्तत्राहानेनवेति।अभिनेतुंअभिनयेनप्रसादयितुं।अभिनयप्रदर्शनेकिमपेक्ष्यते।तदाह।तदादिश्यंतामिति।भरतानटाः
वर्णिकापरिग्रहायनटवेषपरिग्रहाय॥नदीप्राकृतं॥अज्जेति।आर्यपुत्रआश्चर्यमाश्चर्यंयेनसमरविजयलक्ष्मीरासादिताप्राप्तेतिप्राकृतप्रांते
प्राकृतायान्वयः।किंकृत्वा॥कृतीसैन्यसागरंनिर्मथ्य।केनकमिवमधुमथनेनश्रीकृष्णेनक्षीरसमुद्रमिवयथाक्षीरसागरंनिर्मथ्यश्रीकृष्णेन
लक्ष्मीर्लब्धाएवंतेनराज्ञेत्यर्थः।किंभूतेनयेनमधुमथनेनचातथातेनउक्तप्रकारेणनिजभुजबलविक्रमैकेणाभिर्भासितंसकलंराजमंडलं
तेनचशांतपथप्रस्थितेनात्मनोविनोदार्थंप्रबोधचंद्रोदयाभिधानंनाटकमभिनेतुमादिष्टोस्मि॥तदादिश्यंतांभरताःवर्णिका
परिग्रहणायानटीसविस्मयं।अज्जउत्तअच्चरियंरंजेणातधाणिअभुअवलविक्कमेक्कणिभसिदसअलराअमंडलेण॥
आअसाअट्ठिअकढिणकोअंडदंडवहलवरिसंतसरासिअरजज्जरिज्जंततुरअतरंगमालं।णिरंतरणिवडंततिरस्खविरिख
त्तसत्थसहस्सपल्लत्थउत्तुंगमाअंगमहामहिहरसहस्सं॥भमंतभुअदंडचंडमंदराभिघादघुम्मंतसअलपत्तिसलिलसंघादंवक
सासेसासाअरंणिम्महियमहुमहणेणव्वखीरसमुद्दंआसादिदासमरविजअलच्छी॥

येना।कीदृशंकर्णसैन्यसागरं॥आकर्णाकृष्टकठिनोयःकोदंडदंडस्तस्माद्बहुवर्षन्यःशरनिकरोबाणसमूहस्तेनजर्जरीकृतास्तुरगा
स्तएवतरंगमालायस्मिन्।पुनःकीदृशं॥निरंतरंनिपतंतितीक्ष्णानिविक्षिप्तानिइतस्ततःपतितानिशस्त्राणांसहस्राणिअपरिमिता
निशस्त्राणितैःपर्यस्थाःवर्यस्ताउत्तुंगायेमातंगाःकरिणस्तएवमहामहीधराःपर्वतास्तेषांसहस्रंयस्मिन्॥पुनःकीदृशं॥भ्रमन्
योभुजदंडःसएवचंडोमंदरस्तदभिघातेनघूर्णितःसकलोयेपत्तयस्तएवसलिलसंघातोजलसमूहोयस्मिन्॥ ६॥ ॥

आर्यपुत्र आश्चर्यं आश्चर्यं येन तथा निजभुजविक्रमेण निर्भासितसकलराजमंडलेन आकर्णाकृष्टकठिनकोदंडवर्षितविशिख
अजीर्ण ... तुरगतरंगमाले निरंतरनिपतत्तीक्ष्ण ... पर्वतो ... महा ...
सहे
त्र
निरंत

तस्य सांप्रतं सकलमुनिजनश्लाघनीयवीरचरितस्य कथमीदृश उपशमः संवृत्तः

तस्येति। तस्य सांप्रतं सकलमुनिजनश्लाघनीयवीरचरितस्य कथमीदृश उपशमः संवृत्तः। निसर्गसौम्यं स्वभावसौम्यं। सकलेति॥
४ सकला ये भूमिपालास्तेषां कुलं तस्य प्रलयकालाग्निवद्रुद्रः क्रूरस्तेन चेदिदेशाधिपतिना राज्ञा समुन्मूलितं। समुत्पाटितं। सोमवं
×क्षिता ३ श्यानां राज्ञां कीर्त्तिवर्मप्रभृतीनां रक्षितृणां वाधिपत्यं स्थिरीकर्त्तुमयमस्य संरंभः क्रोधः नैमित्तिकः न स्वाभाविकः॥ अमुमर्थं प्र
तस्स संवदं सअलमुणिजणसलाहिणिज्जवीरचरिदस्स कधमेरिसो उवसमो संवुत्तो। सूत्रधारः॥ आर्ये निसर्गसौ
म्यमेव ब्राह्मं ज्योतिः कुतोपि कारणादाप्तविकारमपि पुनः स्वभावमेवावतिष्ठते। यतः॥ सकलभूपालकुलप्रलय
कालाग्निरुद्रेण चेदिपतिना समुन्मूलितं चंद्रान्वयपार्थिवानां पृथिव्यामाधिपत्यं स्थिरीकर्त्तुमयमस्य संरंभः। प
श्य तथा। कल्पांतवातसंक्षोभलंघिताशेषभूभृतः। स्थैर्यप्रसादमर्यादास्ता एव हि महोदधेः। अपि च॥ भगवन्ना
रायणांशसंभूताः भूतहिताय तथाविधाः पौरुषभूषणाः पुरुषाः क्षितिमवतीर्य निष्पादितोत्कृत्याः पुनः शांतिमेव
प्रपद्यंते॥ यथा परशुराममेवाकलयितुमर्हतीति तावत्॥ ×कृ २
कारांतरेणाह। कल्पांतेति। कल्पांते यो वातस्तेन संक्षोभस्तेन लंघिता अशेषभूभृतः पर्वता येन तस्य महोदधेः सागरस्य ×३ स्थैर्यप्रसादमर्यादाः॥ स्थैर्यं निश्चलतां प्रसादः स्वच्छता मर्यादा वेलानु
ल्लंघनं। तथाविधाः तादृशाः पुरुषाः पुनः शांतिमेव प्रपद्यंते प्राप्नुवंति किं कृत्वा क्षितिं पृथिवीमवतीर्य किमर्थं भूतहिताय प्रा
णिनां हिताय पौरुषमेव पुरुषार्थः एव भूषणं येषां ते तथा निष्पादिता निःशेषरूपेण महांति कृत्यानि येस्ते॥ ॥ ॥ ॥ ४
×स २ ३×य: संक्षोभस्तेन लंघिता अशेषाः भूभृतः पर्वता येन तस्य महोदधेः सागरस्य ×३
३×ता एव स्वाभाविका एव॥ ×३

॥:५पे:८८२६१७८८२७५॥ [illegible]

कृपंपरशुरामउग्राणिकर्माणिकृत्वाशांतिमवापेत्यतआह येनेति।सोपिस्ववीर्यादिमनेनयुग्मं।सोपिश्रीमान्जामदग्न्योमुनि
स्तपोभिःप्रशांतकोपज्वलनःसन्शाम्यतिशांतिंगछतिकिंकृत्वानृपाणांकुलंसमुत्खायसमुत्पाद्यभूमेरिस्ववीर्यात्स्वसाम
र्थ्यादेवताभ्यश्चेतियोजनाद्वितीयश्लोकस्यअनेनकृत्यकृतताद्दर्शिता।सकःयेनत्रिःसप्तवारानितित्रिःसप्तकृत्वःएकविंशतिवा
रंभूमिश्च्युतंयद्रुधिरंतस्यसरित्स्यावारिपूरेअभिषेकःस्नानंतर्पणंचअकारिकृतं।कीदृशेवारिपूरेनृपाणांराज्ञांवहलोभू
यान्वसाशुद्धमांसस्नेहश्चमांसंचमस्तिष्कपंकःललाटंतर्गतोधातुश्चएतानिप्राग्भारेतीरेयस्यतादृशेपुनःसकःयस्या
येनत्रिःसप्तकृत्वोनृपबहलवसामांसमस्तिष्कपंकप्राग्भारेऽकारिभूरिश्च्युतरुधिरसरिद्वारिपूरेभिषेकः।यस्यस्त्रीबाल
वृद्धावधिनिधनविधौभिर्दयोविश्रुतोसौराजन्योच्चांसकूटक्षपनपटुरटद्घोरधारःकुठारः।सोपिस्ववीर्यादनता
र्यभारंभूमेःसमुत्खायकुलंनृपाणांप्रशांतकोपज्वलनस्तपोभिःश्रीमान्मुनिःशाम्यतिजामदग्न्यः।तथायममपि
कृतकर्तव्यःसंप्रतिपरमामुपशमनिष्ठांप्राप्तः।येनचविवेकेनवनिर्जित्यमूर्त्तमोहमविवोर्जितंश्रीकीर्त्तिवर्मनृपं
सौकुठारःपरशुःस्त्रीचबालाश्चवृद्धाश्चताएवावधिस्तदवधियन्निधनंमारणंतद्विधौतस्मिन्कर्मण्यभिर्दयोतिकठिनःविश्रुतः
ख्यातःकीदृशःकुठारःराजन्यानांउच्चायेअंसाःस्कंधास्तेषांकूटंसमुदायस्तस्यक्षपनेविनाशेपटुःकुशलःआरटंतीशब्दाय
मानाघोराभयानकाधारायस्य।सर्वातिक्रमाह तथायममिति।विवेकमोहयोर्जयपराजयाभ्यांतयेनगाधिरचयितुंसंगतिमारचय
तियेनचेति।विवेकेनेतियेनऊर्जितंबलवंतंकर्णंनिर्जितःश्रीकीर्त्तिवर्मनृपतेहृदयउत्कर्षःकृतःतत्रदृष्टांतःयथाविवेकेनेवात्मयाथा

४वे१ ४र्त५

मोहं जित्वेति बोधस्यैवोदय इति स्फुटं चा मोहपक्षीयो नटो ध्यक्षमधिक्षिपति ॥ आः पापेति ॥ शैलूषाधम नराधम ॥ उत्तुंगेति । अयं कामः एतिसमासायाति । की
प्रबो॰ दृशः कामः ॥ पुलकितेन रोमांचितेन भुजेन रत्या उत्तुंगमत्युच्चं पीवरं मांसलं यत्कुचद्वयं तेन पीडितमंगं यथा भवति तथा आलिंगितः । पुनः कीदृशः ॥ श्रीमानूशो
५ ख॰ ३ भौनूं ॥ जगंति सचेतनानि मदयन्नुन्मत्तानि कुर्वन् ॥ तथा नयनयोरभिरामः । तथा मदेन घूर्णिते नेत्रकमले यस्य सः भ्रांतनेत्रः ॥ प्रस्तावना कथासंगतिः । तल्लक्षणं ॥ अ
र्थस्य प्रतिपाद्यस्य कथाप्रस्तावना मतेति यथाभिदिष्ट इति पूर्वश्लोक इति शेषः ॥ अनेन विवेक विद्रावणो ऽस्त्रादिभिरनिवार्यः परदर्पासहः कामोऽस्मत्समक्षे

नेपथ्ये । आः पापशैलूषाधम कथमस्मासु जीवत्सु स्वामिनो महामोहस्य विवेकसकाशात् पराजयमुदाहरसि । सूत्रधारः । ससंभ्रमं
विलोक्य । अपि च ॥ उत्तुंगपीवरकुचद्वयपीडितांगमालिंगितः पुलकितेन भुजेन रत्या । श्रीमान्जगंति मदयन्नयनाभिरामः कामोयमेति म
५ दघूर्णितनेत्रपद्मः । प्रवचनाशायमुपजातक्रोधस्तूबोपलक्ष्यते । तदपसरणमेवास्माकमितः श्रेयः । इति निःक्रांतौ । प्रस्तावना । ततः
प्रविशति यथा निर्दिष्टः कामो रतिश्च । कामः ॥ सक्रोधं । आः पापेति पठित्वा ननु रे भरताधम । प्रभवति मनसि विवेको विदुषामपि
शास्त्रसंभवस्तावत् । निपतंति दृष्टिविशिखा यावन्नेंदीवराक्षीणां ॥ ॥ ॥

इति प्रबोधोदयवार्त्तागंधोपि नेति ध्वनितं ॥ आः पापशैलूषाधमेति पूर्ववत्क्रमिति शेषः । भरताधम नराधमेत्यर्थः ॥ कामः स्वसामर्थ्यमावि
ष्करोति ॥ प्रभवतीति । विदुषां पंडितानां शास्त्रसंभवो ॥ विवेकस्तावत्पर्यंतं प्रभवति समुत्पद्यते । तावत्कथं यावत्पर्यंतं इंदीवराक्षीणां कमललो
चनानां दृष्टिविशिखाः कटाक्षरूपा बाणाः न पतंति ॥ तां कटाक्षप्रक्षेपे रंध्रीभूतमिव सचेतनं भवतीति भावः ॥ ॥ श्रीकृष्णा ॥ ॥ ॥ ५

× पि २ तो १

३ ॥ आःपापेति पठित्वेति ॥ ३

रम्यंहर्म्यतलमिति।एतानिमेममअमोघानिसकलानिशस्त्राणिपरितःजयंतियदिसर्वोत्कृष्टानिप्रवर्त्तंतेभोःशैलूषाधमततस्तदाअसौशैलूषाध
मवर्णितोयोविवेकस्तस्यविभवःसामर्थ्यंकीदृक्अथप्रबोधोदयश्चकीदृक्तद्रूपमपिनसंभवतीतिभवः।एतानिकानितान्याह॥रम्यमितिहर्म्य
स्यगृहस्यतलंभूमिः।नवाःनूतनाःसुनयनाःसुलोचनाः।गुंजंतःशब्दंकुर्वंतोद्विरेफाःभ्रमराःयासुतादृश्योलताः।प्रोन्मीलंत्योविकसन
शीलाःनवाःमल्लिकाःमालत्यः॥सुरभयोवाताःसुगंधावायवः।सचंद्राक्षपानिशाः।एतानिममशस्त्राणि।इतिरिति॥आर्यपुत्रगुरुःखलुमहा

।।अपिचा।रम्यंहर्म्यतलंनवाःसुनयनागुंजद्विरेफालताःप्रोन्मीलन्नवमल्लिकाःसुरभयोवाताःसचंद्राःक्षपाः।यद्येतानिजयं
तिहंतपरितःशस्त्राण्यमोघानिमेतद्भोःकीदृगसौविवेकविभवःकीदृक्प्रबोधोदयः॥रतिः।अज्जउत्तगरु उ खुमहारा
अमहामोहस्सपडिवक्खोविवेउत्तितक्केमि।कामः।प्रिये।कुतस्तवेदंस्त्रीस्वभावसुलभंविवेकाद्भयमुत्पन्नंपश्यपश्य
पश्य।अपियदिविशिखाःशरासनंवाकुसुममयंससुरासुरंतथापि।ममजगदखिलंवरोरुनाज्ञामिदमतिलंघ्यधर्तुंमु
हूर्त्तमिति॥

राजमहामोहस्यप्रतिपक्षोविवेकइतितर्कयामि॥त्वंस्त्रीस्वभावसुलभंभयंमाकुरुअहमतिसमर्थोस्मीत्याह॥अपियदिविशिखाइति।
X वि २ अपियद्यपिविशिखाःशराःशरासनंधनुःएतद्द्वयंकुसुममयंपुष्पमयंवर्त्ततेतथापिससुरासुरंसुरासुरैर्देवदैत्यैःसहवर्त्ततेतत्ससु
रासुरंअखिलंसर्वमिदंजगत्भोवरोरुममाज्ञांअतिलंघ्यउल्लंघ्यधर्तुंधैर्यंमुहूर्त्तंक्षणमपिनएतिप्राप्नोति॥ ॥ ॥ ॥

X न १

१ इंद्रादयोपि यासां कटाक्षविक्षेपैः प्रविक्षिप्तचित्ता जातास्तत्राऽन्येषां का गणनेत्याह १

प्र च उक्तमर्थं प्रकटयति तथाहि। अहल्याया जार इति। सुरपतिरिंद्रः अहल्यायाः गौतमपत्न्याः जार उपपतिरभूत्। प्रजानाथो ब्रह्मा मनुः आत्मतनयां
ई शतरूपां अपासीत्। स्वपुत्रीं प्रतिगतः मिथुनभावं प्राप्त इत्यर्थः। इंदुः शशांकः गुरोर्बृहस्पतेरबलां स्त्रियमभजत सिषेवे इति एवं प्रकारेण्ऽप्रति × शापो २
शयेन मया को वा पुमान् पुरुषार्थी अपथे अमार्गे पदं स्थानं न कार्यतां किं तु सर्वोपि कारित एवेत्यर्थः। किमधिकं वाच्यं भुवनानां उन्माथ उन्मा
× सं ष थ उन्माद स्तद्विधिषु तत्कृत्य तासु मत्तीयाये वाणास्तेषां श्रमः कर्त्र न कोपीत्यर्थः। रतिः आर्यपुत्र एवमेवैतत् तथापि महासहायसंपन्नः शंकित
तथाहि। अहल्याया जारः सुरपतिरभूदात्मतनयां प्रजानाथोऽपासीदभजत गुरोरिंदुरबलां इति प्रायः को वा न पदमपथे कार्यतम
याश्रमोमद्वाणानां कृरवभुवनोन्माथविधिषु रतिः। अस्त्वेतत्त एवं वेदं तथापि महासहाऽसंपन्नोसंविद् द्वेअरातीजदोस्से
जमति। अमत्यमुहा अमत्त्वा महावलाः सुली अतिकामः। प्रियेपाने तानू राशोनिवेकस्य बलवतो यमादीन माहात्म्यश्यपासि
त एते नियतमस्माभिरभियुक्तमात्रा तद्रागेव विघटयिष्यंते। तथाहि। अहिंसा कैव कोपस्य ब्रह्मचर्यादयो मम। लोभस्य पुर
तः के मी सत्यास्तेयापरिग्रहाः। यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयस्तु निर्विकारैकचित्तसाध्यत्वादी ॥
षक्कर समुन्मूलना एव॥ ॥ ॥

धोऽरातिः। यतोस्य यमनियमप्रमुखा अमात्या महाबलाः स्वरूपं ते। अभियुक्तमात्रा प्रतिकूलसंगात् द्रागेव शीघ्रमेवाविघटयिष्यंते विवेका ॥
द्वेदं प्रत्यंते। अहिंसेति। कोपस्य अहिंसा कैवन कापीत्यर्थः। मम कामस्य ब्रह्मचर्यादयः के न केपि अमी सत्यास्तेयापरिग्रहाः लोभस्य
पुरतः के न केपीत्यर्थः। एतावता एते सुखेन जेतुं शक्या इति भावः। यमादेः किं कार्यमत आह। यमेति रिपक्करं सुकरं समुन्मूलनं नाशो यो ईं
यमदीनां परिहाराय उपायः कार्य इत १ = यमिनमरिष्यं

१ अहिंसासत्याऽस्तेयब्रह्मचर्याऽपरिग्रहा यमाः। शौचसंतोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः। स्थिरसुखमासनं। श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥ स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इव १
१ इंद्रियाणां प्रत्याहारः। नाभ्यादिदेशसंबंधश्चित्तस्य धारणा। ध्येयैकतानता ध्यानं। तदेवाऽर्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। इति यमादीनां स्वरूपं ॥ २ ॥ ईदृशम् =

एतेषां विजये उपायांतरमाह॥ स्त्रिय एवेति। अस्मद्गोचराः अस्मदधीनाः अधीनत्वे हेतुमाह ॥ यत इति। संचिंतितं विलोकनमवलोकनं। भाषणं मधुरालापः विलासो विभ्रमः। परिहासः केलिः नर्मकथा क्रीडा। परिरंभ आलिंगनं। इमानि संतु तिष्ठंतु कामिनीनां स्मरणमपि मनसो विकाराय विकारं कर्त्तुमलं समर्थं किं बहुना ते अस्मद्वशे स्थास्यंसे ते स्याह॥ विशेषतश्चेति॥ अभियुज्यमाना आज्ञाप्यमानाः॥ नरपतिर्महामोहः। तन्मंत्रिणां अधर्म अधर्ममूलमोहादयः इति भावः॥ अज्ज उत्तसुदमिति॥ श्रुतं मया युष्माकं शमदमविवेकप्रभृतीनां च एकमुत्पत्तिस्था

अपि च। स्त्रिय एवामी वांकृत्या। तेनैते ऽस्मद्गोचरा एव वर्त्तंते॥ यतः॥ संतु विलोकनभाषणविलासपरिहासकेलिपरिरं भाः। स्मरणमपि कामिनीनामलमिह मनसो विकाराय॥ विशेषतश्चैते मदमात्सर्यदंभादिभिरस्मत्स्वामिवल्लभैरभियु ज्यमाना नरपतिमंत्रिणामधर्ममेवाश्रयिष्यंति॥ रतिः। अज्ज उत्तसुदं मए तुह्माणं समदमाविवेअपहुदीणं च एक्कं उप्पत्ति वृणंति॥ कामः। आः प्रिये। किमुच्यते एकमुत्पत्तिस्थानमिति ननु जनक एवास्माकमभिन्नः। तथा हि॥ संभूतः प्रथममिहेश्व रस्य संगान्मायायां मनरतिविश्रुतस्तनूजः॥ त्रैलोक्यं सकलमिदं विसृज्य भूयस्तेनाथो जनितमिदं कुलद्वयं नः॥ तस्य प्रवृत्तिनिवृत्ती द्वे धर्मपत्न्यौ। तयोः प्रवृत्त्यामुत्पन्नं महामोहप्रधानमेकं कुलं॥ निवृत्त्यां च द्वितीयं विवेकप्रधानमिति॥

नमिति। आः आर्ये एकमपि कर्त्तृत्वादाश्चर्यं तदेवाह॥ तथा हीति। संभूत इति॥ ईश्वरस्य परमात्मनः संगात् संबंधात् मायायां अविद्यायां मनरतितनूजः पुत्रः विश्रुतः लोकप्रसिद्धः प्रथमं आदौ संभूत उत्पन्नः तेन मनसा इदं सकलं त्रैलोक्यं विसृज्य विशेषतः सृष्ट्वा अथो अनंतरं भूयो भूयो वारंवारं इदं प्रसिद्धं नो अस्माकं कुलद्वयं जनितं महामोहप्रधानं विवेकप्रधानं चैतदेवाह॥ तयोरिति॥

प्रबो० रतिः। अज्जेत्ति॥ आर्यपुत्र यद्येवं तत् किंनिमित्तं युष्माकं सोदराणामपि परस्परं एतादृशं वैरं। सोदराणामपि दृढमस्ति वैरमित्याह। एकामिष
७ मिति। सहोदराणां गोत्रजानां एकामिषप्रभवमेव वैरं समुज्जृंभते प्रकृष्टीभवति इति जगति प्रसिद्धं अत्र दृष्टांतमाह हीति निश्चितं कुरुपांडवा
नां पृथ्वीनिमित्तं यथा स्यात्तथा तीव्रो दारुणः तथा अतिप्रसिद्धो भुवनक्षयकृत भुवननाशको विरोधः अभवत्। एकामिषप्रभवमेवं दर्शय

रतिः। अज्जउत्त जदि एव्वं ता किं णिमित्तं तुह्माणं सोअराणं पि परोप्परं एआरिसं वेरं॥ कामः। प्रिये। एकामिषप्रभवमेव सहोदराणामुज्जृं
भते जगति वैरमिति प्रसिद्धं। पृथ्वीनिमित्तमभवत् कुरुपांडवानां तीव्रस्तथा हि भुवनक्षयकृद्विरोधः॥ सर्वमेवैतज्जगदस्मत्पित्रो
पार्जितं। तत्रास्माभिस्तातवल्लभतया सर्वमिवाक्रांतं तेनेदानीं तु विरलः प्रचारः। तेनैते पापाः सांप्रतं पितरमस्मांश्चोन्मूलयि
तुमुद्यताः। रतिः। संतं पावं २ अज्जउत्त किं एदं पावं विद्देसमेत्तकेण तेहिं आरद्धं। अहवा अत्थि उवाओ को वि एत्थ मंतिदो।
कामः। अस्त्यत्र किंचिन्निगूढं बीजं। रतिः। अज्जउत्त ता किं ण उग्घाडीयदि॥ कामः। स्त्रीस्वभावाद्भवती भीरुरिति न तद्दा
रुणं पापीयसां मुद्धाह्रियते। रतिः। समप्पं। अज्जउत्त केरिसं तं॥ कामः। प्रिये। न भेतव्यं र हताशानामाशामात्रमेतत्॥ अ
स्ति किले बाकिंवदंती अत्रास्माकं कुले कालरात्रिकल्पा विद्यानाम राक्षसी समुत्पत्स्यत इति।

ति॥ सर्वमेवेति॥ रतिः॥ शांतं पापं आर्यपुत्र किमिदं पापं विद्वेषमात्रकेणैव तैरारब्धं। अथवा अस्त्युपायः कोपि अत्र मंत्रितः॥ निगूढं
गुप्तं बीजं कारणं। आर्यपुत्र तत् किं नोद्घाट्यते कीदृशं तत् हताशानां नष्टाशानां किंवदंती जनश्रुतिः लोकप्रसिद्धिः न तु निश्चयः।
विद्या आत्मतत्त्वसाक्षात्कारः। क्रूरकर्मकरणाद्राक्षसीत्वोक्तिः॥ ६॥ ७

रतिः। हाधिक् हाधिक्। कथमस्माकं कुले राक्षसीति वेपते मे हृदयं। किं वदंती मात्रमेतदिति पुनराश्वासनं। अथ तया राक्षस्या किं कृतं स्यं
प्राजापत्याद्धिरण्यगर्भसंबंधिनी सरस्वती वाणी पुंसरति पुंसः परमेश्वरस्य गृहिणी स्त्री मनोरूपं तनयं पुत्रं प्रसूय उत्साद्य लोका
न् भूर्भुवादीन् क्रमात् श्रुतीरितात् श्रुत्युक्त मार्गेण। असूतं जनयामास। कीदृशस्य पुंसः। संगेन संबंधेन समुज्झितस्य रहितस्य। अ XT २
संगो ह्ययं पुरुषं इति श्रुतेः। कीदृशी माया तेन पुंसा अस्पृष्टापि असंबद्धापि। असंबद्धापि जनयतीत्युक्तं प्रतिनाशं कनीयं चुं

रतिः। सम्मपं। हद्धी हद्धी कहं अह्माणं कुले रक्खसीत्ति बेवदि मे हिअअं। कामः। प्रिये न मेतव्यं न मेतव्यं। किं वदंती मात्र
मेतत्। रतिः। अध ताए रक्खसीए किं कादव्वं। कामः। प्रिये अस्ति किल तत्र प्राजापत्या सरस्वती पुंसः संगसमुज्झितस्य
गृहिणी माया इति तेनाप्यसावस्पृष्टापि मनः प्रसूय तनयं लोकान् सूतं क्रमात्। तस्मादेव जनिष्यते पुनरसौ विधेति कृ
न्यायपातात्तस्ते च सहोदराश्च जननी सर्वं च भक्ष्यं कुलं। रतिः। सत्रासो त्कंपं। अज्ज उत्त परित्ताहि इति भर्त्तारमालिंग
ति। कामः स्पर्शसुखमभिनीय स्वगतं॥

न कृपाबाणेनासंबद्धा लोहशलाकाचुंबकं यांतमनुयाति रतिदृष्टं लोके तद्वदियमसंबद्धापि ईक्षणमात्रेण जनयतीत्यर्थः। अथ
इति घटनापटीयस्यामिदं सर्वमपि संभाव्यते इत्याह माया इत्यनेन विशेषणेन पुनः शब्द आनंतर्यार्थः। पुनः अनंतरं असौ विधेति
प्रसिद्धक न्यात् तस्मादेव मनस एव सकाशात् जनिष्यते उत्पत्स्यते। असौ कीदृशी पापाकन्यपातातः पिता ते सहोदरा बंधवश्च जननी माता
सर्वं कुलं कुलांतः पातित्वात् तमापि भक्षणीय इति सर्वं तस्यैव भक्ष्यं। आर्यपुत्र परित्राहि इत्यपाविनाघचेष्टया प्रदर्शनमभिनयः स्व

कंदमनस्खबा ॥१७॥

प्रबो० स्फुरदिति। अधीराक्ष्याः चपलाक्ष्याः परिरंभ आलिंगनं मोदं आनंदं जनयति उत्सादयति संमोहयति च॥ संमोहो नाम विषयांतरविस्मरणं च
८ कुरो तीसर्पः। कीदृशः परिरंभः स्फुरन्नरामोद्भेदः रोमांचोद्गमो येन सः। पुनः कीदृशः। भयेनोत्कटः कंपो यस्तोत्तो च तावुत्तुंगौ उच्चौस्त
नौ च तयोर्युगं युग्मं तस्य भरस्तदासंगेन संबंधविशेषेण सुभगो मनोहरः। पुनः कीदृशः। गुंजच्छ्रायमानं मणिवलयं यस्यां सा ता

स्फुरद्रोमोद्भेदस्तरलतरताराकुलदृशो भयोत्कंपोत्तुंगस्तनयुगभरासंगसुभगः। अधीराक्ष्या गुंजन्मणिवलयदोर्वल्लि
8 रचितः परीरंभो मोदं जनयति च संमोहयति च। प्रकाशं दृढं परिष्वज्य प्रियेनमेतत्वयं॥ अस्माकं सुजीवत्सु कुतो विद्योत्पत्तिः।
रतिः। अध किं ताए एरस्स वसीए उप्पत्ती तुल्लाणं पडिवक्खाणं संमदो काम। बाढं। सा खलु विवेकेनोपनिबद्ध्यां प्रबोध
चंद्रेण भात्रासमं जनयितव्या। तत्र सर्व एते शमादयः प्रतिपन्नोद्योगाः॥ रतिः। अज्ज उत्त कहं एदेहिं अप्पणो विणासका
रिणी एविज्जा ये उप्पत्ती तेहिं दुव्विणीदेहिं सलाहिज्जदि॥ राम॥ ॥ ॥

दशीदोर्लता बाहुवल्ली तया रचितः संपादितः। कीदृश्याः अधी[illegible]क्ष्याः। तरलतरा तारा अक्ष्णः कनीनिका तया आकुला व्या
कुला दृक् यस्याः। रतिः॥ अथ किं तस्या राक्षस्या उत्पत्तिर्युष्माकं प्रतिपक्षाणां संमता। बाढं अवश्यं संमतेति शेषः। सा खल्वि
ति। सा विद्या अनावृतब्रह्माकारांतःकरणवृत्तिः। अनावृतब्रह्माकारांतःकरणवृत्त्युपहितं चैतन्यं प्रबोधचंद्रः। आर्यपुत्र
कथमेतैरात्मनो विनाशकारिण्या विद्याया उत्पत्तिस्तैर्दुर्विनीतैः श्लाघ्यते॥ एतैस्तैर्दुर्विनीतैर्विद्याया उत्पत्तिः कथं श्लाघ्यत ८
इति प्राकृतयोजना॥ राम॥

सहजेति॥ सहजं स्वाभाविकं मलिनं दुष्टं अत एव वक्रं भावं चित्ताभिप्रायं भजंति सेवंते ये ते तादृशाः तेषां भवः उत्पत्तिः प्रभवस्य उत्पत्तिस्थान
स्य आत्मनश्च नाशहेतुर्भवति। उक्तेऽर्थेऽर्थांतरन्यासः। धूमो जलधरपदवीम् वाप्य मेघमार्गपर्यंतं गत्वा स्वोत्पत्तिस्थानं वह्निस्तन्नाशमनु
नाशं प्रयाति धूमोपि सहजमलिनवक्रस्वभावश्चेति भावः। नेपथ्ये॥ जनिकायां। नेपथ्यं स्याज्जवनिकारंगभूमिः प्रसाधनमित्यजयः। गुरोरि
ति। अवलिप्तस्य सगर्वस्य लसत्प्रतिपन्नस्य उन्मार्गगामिनः। शेषं सुगमं। गाथा॥ पदसंदर्भरूपा॥ अनेनेति॥ जनकेन मनसा॥ अहंकारा
काम॥ कुलक्षयप्रवृत्तानां पापकारिणां कुतः प्रत्यवायगणना। पश्य। सहजमलिनवक्रभावभाजां भवति भवः प्रभवात्मना
शहेतुः। जलधरपदवीमवाप्य धूमो ज्वलनविनाशमनुप्रयाति नाशं। नेपथ्ये। आः पापदुरात्मन् कथमस्माकं नवपापकारिण
इत्याक्षिपसि। ननु॥ गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः। उत्पथप्रतिपन्नस्य परित्यागो विधीयते॥ इति यो रागी कींगा
यो पुराणविद उदाहरंति॥ अनेन चास्माकं जनकेन अहंकारानुवर्त्तिना जगत्पतिस्त्वापि तेन वद्धः। मोहादिभिश्च स एव बं
×क्षपानलो×२ धः सुदृढं नीतः। कामः। विलोक्य प्रिये अयमस्माकं कुलं ज्यायान् देव्या ममत्वा सह विवेक इत एवाभिवर्त्तते। य एषः। रागादि
भिः स्वरसवारिभिरानत कांतिर्निर्भत्स्यमानरवमानधनैः कृशांगः। मत्यानि तांत कलुषीकृतया शशांकः कांत्येव सांद्रतुहि
भि×१ नुवर्त्तिना अहंकाराध्यासयुक्तेन जगत्पतिः पिते न परमेश्वर एव। मोहादिभिरित्यादि वर्त्तत इत्यंतं सुगमम्॥ य एषः। रागादिभिरि
ति। य एषः पूर्वोक्तो विवेकः मत्या बुद्ध्या विभाति॥ कथंभूतया मत्या॥ रागादिभिर्भिताततमतिशयेन कलुषीकृतया॥ कीदृशैः रागादिभिः। स्वरस
वारिभिः अविविच्य स्वेच्छाप्रवर्त्तैः॥ आदिशब्दान्मदमोहादयः तैः॥ आत्त कांतिर्यस्य उत्प्रेक्षते। निर्भत्स्यमानः रवानि प्रभीक्ष्णमाण
रवा। पुनः कीदृशो विवेकः। मान एव धनं यस्य। कृशांगः यंगानि यस्य कृषाकृष्वं कांगा शशांक इव। कीदृशः शशांकः। सांद्रेणातिविडे

गतात्हरितोविभाति॥

गद्धिहितनहि मेत्तांतरितः अत्ताद्द ताः॥

१×॥ पुनः कीदृशो विवेकः ॥×१ २×॥ कीदृशो विवेकः॥ आत्तकांति ×२

प्रबो० तन्नयुक्तमित्यनेन कामरत्योः निःप्रमनत्वं विवेकोदयमात्रेण प्रदर्शितं। विधकं मइति प्राक्तन नाटसंक्षेपः उक्तरूपात्रप्रवेशः राजा विवेकः। आर्य
१ पि पुत्र किमात्मनोदोषं लोको विजानाति। असाविति। तैः प्रसिद्धैर्मदादिभिरसौ जगत्प्रभुः परमात्मा चिरं चिरकालं दीनां [illegible] आनंदशून्यां यादशां तां
अनीय तप्रापितः। कीदृशैर्मदादिभिः अहंकारः परः प्रथमो येषां तैः पुनः कीदृशैः दुरात्मभिर्दुष्टस्वभावैः किं कृत्वा पाशशतैः पाशाः वासनासंस्का
रास्तद्रूपैः निबध्यानियम्य। शक्यबंधनः सुखेन बध्यते अयं तु न तथेत्याह कीदृशो जगत्प्रभुः चिदानंदमयः ज्ञानस्वरूपः पुनः निरंजनः निर्ग
तमंजनं मोहावरणं यस्मात्॥ मतिः। अज्ञेति॥ आर्यपुत्र यतो सौ सहजानंदसुंदरस्वभावो नित्यप्रकाशं विस्फुरत्सकलत्रिभुवनप्रचारः
परमेश्वरः श्रूयते तत्कथमेतैर्दुर्विदग्धैर्बध्वा महामोहसागरे निक्षिप्तः सततेति। पुमान्सहजं स्वाभाविकमपि धैर्यं त्यजति औपाधिकं य
तन्नयुक्तमिहास्माकमवस्थातुमितिनिष्क्रांतौ विष्कंभकः। ततः प्रविशति राजा मतिश्च। राजा प्रिये पश्य तं तथा स्पर्दुर्विनीतस्य बटो
र्मदविस्फूर्जितं च चं यदस्मान्नेव पापकारिवारस्याक्षिपति। मतिः। अज्ज उत्तं किमप्पवो दोसे उँ विआ वादी। राजा प्रिये पश्य असावहं x ओ २
कारपरैर्दुरात्मभिर्निबध्यते पाशशतैर्मदादिभिः चिरं चिदानंदमयो निरंजनो जगत्प्रभुर्दीनदशामनीयत। तएते पुण्यकारिणो न यं त
मुक्तयेप्रवृत्ताः पापकारिण इति जितं दुरात्मभिः। मतिः। अज्ज उ तं ज दोसो सहज आनंदसुंदरसहावो णिच्चप्पआसो विप्फुरंतस
अलतिहुअणप्पआरो परमेसरो सुणीअदि ता कधं एदेहिं दुव्विअदेहिं बंधिअ महामोहसाअरे णिरिक्खत्तो राजा प्रिये सततधृतिरप्यु x त्र ५
च्चैः शांतोप्यवाप्य महोदयोप्यधिगततनयोप्यंतः स्वस्थोप्युदीरितधीरपि। त्यजति सहजं धैर्यं [illegible]
स्त्रीभिः प्रतारितमानसः स्वमपि पदं मायासंगात्पुमानिह विस्मृतः॥ ॥ राम॥
जतीत्यत्र किं चित्रं धैर्यत्यागे हेतुमाह। स्त्रीभिरिति॥ स्त्रीभिः प्रतारितं वंचितं मानसं यस्य सः उच्चैरिति सर्वत्र संबधनीयं कीदृशः पुमान् सततं नि
२४ प्राप्तः रंतरं धृतिर्धैर्यं यस्य तादृशोपि शांतोपि जितेंद्रियोपि अनाप्तः महोदयो ऐश्वर्यं येन तादृशोपि अधिगतः ज्ञातः नयो नीतिर्येन तादृशो
पि अंतः स्वस्थोपि अव्यग्रांतःकरणोपि उदीरिता सम्यग्वर्णिता धीर्बुद्धिर्यस्य तादृशोपि स्वस्मिन्नेवेदं सर्वमिति लोकयतामित्याह। स्वमपीति।

x धी x१ वे x१

यत्पस्माद्धेतोः मायासंगात् अविद्यासंबंधात् पुमान् परमात्मा स्वात्मानमपि रहस्यमीं विस्मृतः। अपिस्त्वत्तदर्थ व्यतिरेकसमुच्चयार्थः॥
१

×परपुरुषं ३ × अप्रसवेन ×२

अजानतीमायाकार्यंपृच्छतिमतिःअज्जउत्तस्यादिना। आर्यपुत्रनखलुअंधकारत्ले त्वयासहस्मरशमेत्तिरस्कारःयन्मायपातथास्फुरन्महाप्रकाशसागरस्पदेवस्याप्यमिभवः। मायांकार्यंप्रकटयति। अविचारेति। अविचारसिद्धाअनिर्वचनीयासत्त्वेनवाविचारयितुमशक्या।। वारविलासिनीववेश्येव। असतोपिभावान्अविद्यमानान्अपिकर्तृत्वमोक्तृत्वादीनुपदर्शयंतीवंचयति। यदिनप्रत्ययसेतर्हिपश्येत्याह।। पश्यपश्येतिकिंपश्येत्याह स्फटिकेति। अनयामायपाअनार्ययाअश्रेष्ठयाअनर्थकारिण्याभास्वान्स्वयंप्रकाशोदेवः परमात्माप्रगाढमति

१×२×१ मतिः। अज्जउत्तएणखुअंधआरत्लेहाएसहस्सरस्सिलोतिक्कारोजंमाआएतधाफुरंतमहापआससाअरस्सदेवस्सविअहि
हवे। राजाप्रियेअविचारसिद्धेयंवारविलासिनीवमायासतोपिभावानुपदर्शयंतीपरपुरुषंवंचयति पश्यपश्य स्फटिकमणिव
द्भास्वान्देवःप्रगाढमनार्ययाविकृतिमनयानीतःक्वामप्यसंगतविक्रियः। नखलुतदुपश्लेषादस्यव्यपैतिस्वनिर्मला प्रभव
तितथाप्येषावाढंविधातुमधीरता।। मतिः। किंउणकारणंजेणसातधाउआरचरिदंदुव्विअड्ढापआरेदि। राजा नखलुप्रयो
जनंकारणंवाविलोक्यमायाप्रवर्त्तते। स्वभावःखल्वयंस्त्रीपिशाचीनां।।

शापेनकामपिअनिर्वचनीयांविकृतिंविकारंनीतःप्रापितः। तर्हिसाकृतार्थैवजातेत्याह। तदुपश्लेषादिति। तदुपश्लेषात्तत्संसर्गातअ
स्यात्मनोमनागपिईषदपिस्वच्छिःस्वस्वरूपप्रकाशःनखलुअपेतिगच्छति। तत्रहेतुःअसंगतविक्रियःअसंगताअसंभाविताविक्रियाविका
रोयत्र। तत्रदृष्टांतःस्फटिकमणिवत्। यथास्फटिकःजपाकुसुमसंनिधानाद्रक्तोपिस्वाभाविकंश्वैत्यंनजहातितथोपाधिसन्निधाना
द्विकृतोपिस्वस्वरूपान्नहीयतइत्यर्थः। यद्यप्येवंतथापिवाढमतिशयेनएषामायाअधीरतांविधातुंस्वस्वरूपात्प्रच्यावयितुंप्रभवतिप्रवर्त्त
ते। किंपुनःकारणंयेनसातथाउदारचरितंदुर्विदग्धाप्रतारयतिप्रयोजनंकार्यं।। राम।।

४×प्रवेरितद्वव×४

प्रबो० संमोहयंतीति॥ वामनयनाः कपटदक्षयः सदयं यथास्यात्तथा नराणां हृदयं प्रविश्य किं नाम न समाचरंति अपितु सर्वं विडंबयंति अनुकुर्वंतीत्य
१० र्थः।शेषं सुगमं॥ मतिः॥ आर्यपुत्र किं तत्कारणं।राजा। एवमनयेति।स्वतनयं मनोरूपं पारमेश्वरे पदे आलस्य व्यवहार विषये स्थाने निवेशया
मि स्थापया मीत्यर्थः। निर्जितांतप्रयासन्नतया अभेदसंवेधेन नवद्वाराणि पुराणि शरीराणि। एकइति। तेषु शरीरेषु एकोपि एक एवपर
४×ब×४ मात्मा विच्छिदेव दर्पणकुलेव बहुधा अनेकप्रकारः विनिवेशितः विनिवेशितः सर्वं विंबप्रतिविंबन्यायेन प्रवेशः इत्यर्थः।अथो अनंतरं तस्मि
पश्यसंमोहयंति रमयंति विषादयंति निर्भर्त्सयंति मदयंति विडंबयंति। एताः प्रविश्य सदयं हृदयं नराणां किं नाम वामनय
नानसमाचरंति।अस्ति चापरमपि कारणं॥ मतिः॥ अज्जउत्त किं तं।राजा। एवमनया दुराचारया चिंतितं अहं तावद्गतयौवना बली
यसी अयं च पुराणः पुरुषः स्वभावादेव विषयरसविमुखः ततः स्वतनयमेव पारमेश्वरे पदे निवेशयामि तमेव चमातुरभिप्रा
४×ता×४ यमासाद्य निर्जितांतप्रयासन्नतया तद्रूपमिवापन्नेन मनसा नवद्वाराणि पुराणि निर्माय। एकोपि बहुधा तेषु विच्छिद्येव विनिवे
शितः।स्वचेष्टितमपोतस्मिन्विदधाति मणाविव॥ मतिः॥ विविंय।अज्जउत्त जादिसी मादा पुत्तको विता दिसो ज्जेव जादो।राजा॥
ततोसावहंकारेणाचित्तस्य ज्येष्ठपुत्रेणानप्राप परिक्षिप्तः। ततश्चासावीश्वरः॥ ॥ राम॥
स्वचेष्टितं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादि धर्मं विदधाति प्रक्षिपति।तत्र दृष्टांतो मणाविव।यथाजपादिरुपाधिः स्वधर्मं रक्तत्वा
दिकं मणौ प्रक्षिपति तद्वदित्यर्थः। मतिः।आर्यपुत्र यादृशी माता पुत्रकोपि तादृश एव जातः।अवस्थांतरमप्याह॥ ततोसाविति॥ असौ
परमात्मा अहंकारेणानप्राचित्तस्य ज्येष्ठपुत्रेणापरिक्षिप्तः।अहमिति व्यवहारविषयः कृतइति योजना॥ ततश्चासावीश्वर इति अग्नि
मश्लोकोपस्कारः॥ ॥ राम॥

ततः किं स्यादत आह। जातोहमिति। विद्वान् ईश्वरः अविद्यामयीं अविद्याप्रधानां निद्रां एतां प्राप्य बहुविधान् अनेकाकारान् रमान् स्वप्नान् पश्य
ति। कीदृशो विद्वान् विघूर्णितः विस्मृतस्वस्वरूपः पुनः कीदृशः चित्तस्य मनसः स्पंदितं चेष्टितं तस्य कल्पनां रचनां अनुपतन् अनुगच्छन् आर
मान् कामिसाह। जातोहमित्यादि जनकोमम एष रतिर्योजनासु गममन्यता। मतिः। आर्यपुत्र एवं दीर्घदीर्घतर निद्राविद्रावितप्रबोधे परमेश्वरैक
थं प्रबोधोदयस्तस्मिन् भविष्यति। मतिः। आर्यपुत्र किमिति गुरुतर लज्जाभरनमितशेखरस्तूष्णीं भूतोसि। मतिः। आर्यपुत्र अन्यास्ता स्त्रियः याः
स्वरसप्रवृत्तस्य बाधमर्थव्यापार प्रस्थितस्य वामत्तुर्दृ रयेप्सितं विघ्नंति मानिन्या इतीयं दिउपनिषद्देव्याः मया सह संगमः स्यात्तदा प्रबो
जातोहं जनको मम एव जननी क्षेत्रं कलत्रं कुलं पुत्रा मित्रमेरातयो वसु बलं विद्या सुहृद्बांधवाः चित्तस्पंदितकल्पनामनुपतन् विद्वान् विद्या
मयीं निद्रां मे तां विघूर्णितो बहुविधान् स्वप्नान् इमान् पश्यति॥ मतिः॥ अज्जउत्त एवं दीहदीहतराणिद्दाविद्दाविअप्पबोहे परमेसरे कधं पबो
होव्वत्ती भविस्सदि राजा सलज्जमधोमुखस्तिष्ठति मतिः। अज्जउत्त किंति गुरुअरलज्जाभरणामिदसेहरो तुह्णीं भूदोसि। राजा प्रिये से
व्वं प्राये पापो पितां भवति हृदयं तेन सापराधमिवासाशंके मतिः अज्जउत्त अस्सा तारिसिआउ जाउ सरसं पउत्तस्स वा धंम्माथे
वावारे पत्थिदं अस्स भत्तुणो हिअआच्छिअं विहणंति। राजा प्रिये मानिन्याश्चिरविप्रयोगजनितासूयाकुलाया न वेद्यांशादेरनुकूलना
दुपनिषद्देव्या मया संगमः। तूष्णीं चेद्विषयानपास्य भवती तिष्ठेन्मुहूर्त्तं ततो जाग्रत्स्वप्नसुषुप्तिधामविरहात्प्राप्तः प्रबोधोदयः॥ प्रबो
धोदयः प्राप्तस्तन्नयः। कीदृश्याः उपनिषद्देव्याः मानिन्याः स्त्रीणामीर्ष्याकृतः कोपो मानस्तदभिधीयते ईर्ष्याकृतकोपवत्याः। चिरं विप्रयोगो
वियोगस्तेन जनिता या असूया ईर्ष्या तया आकुलाया व्याकुलायाः। संगमे हेतुः। शांत्यादेरनुकूलना दितिहे अंतरमाह भवती त्वं भवती
विषयानपास्य मुहूर्त्तं तूष्णीं तिष्ठेच्चेत्तदा जाग्रत्स्वप्नसुषुप्तिधामविरहात्। रति। धामशब्दो त्र स्थानवचनः। धामानि त्रीणि भवंति स्थानानि जा
ग्रत्स्वप्नसुषुप्तीति नैरुक्ताः तथा चायमभिप्रायः। जाग्रदाद्यभिमानस्थानाभावात् शांत्यादिमतो विचारप्रवृत्तस्य बुद्धेर्व्यासंगाभावात् प्रबोधोदयस्ति

*मद्विचेष्टक...र्षणमयि *तोहं ...ल ×५

=विज्जाए=२

=मुर्कां=२

=धम्मात्थपथ=४

॥ प्रबोधचंद्रोदयटीका ॥

निनामा

प्रबो० मतिः। आर्यपुत्र यदि एवं कुलप्रमोद दृढग्रंथिनिबद्धस्यापि बंधमोक्षो भवति तदा नयो निमित्तानुबंध एव आर्यपुत्रो भवतीति सुष्ठु मे प्रियं। आ
११ र्यपुत्र दृढग्रंथिरहंकारस्तन्निबद्धस्य तदभिमानिनोपि यदि बंधमोक्षः संसारान्निवृत्तिः तदा तयो अनादिमायया निमित्तानुबंध एव अहंकाराभिमा
न्येव सर्वदा भवतीति प्राकृतान्वयः। अहंकारस्य परस्परमतेनिमित्तत्वात्तन्नाशाभावादिति भावः॥ वध्वैक रतिमया असावात्मा ब्रह्मैकतां
चिदानंदब्रह्मैकभावं नीयते किं कृत्वा तेषां पूर्वोक्तानां ब्रह्मभिदां ब्रह्मभेदकानां विधया ब्रह्मादैतसाक्षात्कारेण प्राणांतिकं देहांतं प्राय

मतिः। अज्जउत्त जइ एवं कुलप्पहुणो दिढगंठिणिबद्धस्सवि बंधमोक्खो भोदि तदो ताए णिच्चाणुबंधो ज्जेव अज्जउत्तो भो
दुत्ति सुठ्ठु मे पिअं। राजा। प्रियेपयेवं प्रसन्नासिसिद्धास्तर्हि चिरमस्माकं मनोरथाः। तथाहि वध्वैको बहुधा विभज्य जग
तामादिः प्रभुः शाश्वतः क्षिप्तात्मायेः पुरुषः पुरेषु परमं मत्योः पदं प्रापितः तेषां ब्रह्मभिदां विधाय विधिवत्प्राणांतिकं वि
२४मx२ धया प्रायश्चित्तमिदं पापुनरसौ ब्रह्मैकतां नीयते। तद्भवतु प्रस्तुतविधानाय प्रबोधोत्पत्तये शमदमादीन्प्रयोजयाम
मरतिनिष्क्रांतौ॥ ॥इति श्रीकृष्णमिश्रविरचिते प्रबोधचंद्रोदये प्रथमोंकः॥ ॥ ॥

श्चित्तं रहस्यं प्रसिद्धं विधाय कृत्वा। तेषामित्यत्र ते के। ये जगतामादिः प्रभुः स्वतंत्रः शाश्वतोऽविनाशी एवंभूतोपि पुरुषः परमेश्व
रः पुरेषु नरनारकादिशरीरेषु एकएव बहुधा विभज्य बध्वा क्षिप्तात्मा प्रवेशय मत्योः पदं जननमरणस्थानं प्रापितः। प्रस्तुतविधा
नाय पूर्वोक्तार्थसिद्धये प्रबोधोत्पत्तये अद्वितीयात्मसाक्षात्कारोत्पत्तये॥ इति श्रीप्रबोधचंद्रोदयव्याख्याने प्रकाशाख्ये
नृहविनायकात्मजदीक्षितरामदासीये प्रथमोंकः॥ ॥ ६९॥ ॥ ११

४२

प्रथमेंके स्नानकृतोनिखिलोपिभेदावभासआत्मा द्वैतावभासान्निरस्यइतिप्रतिपाद्यविवेकोद्योगमुपक्रसरस्रानींद्वितीयेंके महामोहोपिजै
तद्धर्मानुष्ठानवैफल्यापदंभादीन्प्रेषयति।तथोक्तंदंभैर्विनायः क्रियतेसधर्मइति। ततः प्रविशतिदंभइत्यादि।सामाद्येनअमात्यामंत्रिणास्त
सहितेन।अवहितै अंवधानयुक्तैः सावधानैरित्यर्थः प्रतिकर्त्तव्यः दूरिकर्त्तव्यः निश्रेयसविघ्नार्थंमोक्षप्रतिबंधार्थंप्रयततां अतिशयि

१४॥ दंभः॥४ ततः प्रविशतिदंभः। आदिष्टोस्मिमहाराजमहामोहेन।यथावत्सदंभप्रतिज्ञातंसामाद्येनविवेकेनप्रबोधोदयायप्रे
षितास्त्वतेषुतेषुतीर्थेषुशमदमादयः सचायमस्माकमुपस्थितः कुलक्षयोभवद्भिरवहितैःप्रतिकर्त्तव्यः तत्रपृथिव्यां
परमंमुक्तिक्षेत्रंवाराणसीनामनगरी तद्भवांस्तत्रगत्वाचतुर्णामप्याश्रमाणांनिःश्रेयसविघ्नार्थंप्रयततामितिं तदिदा
नींवशीकृतभूरिष्ठामयावाराणसी।संपादितश्चस्वामिनोमयायथानिर्दिष्टआदेशः।तथाहिंमदधिष्ठितैरिदानीं।वे
श्यावेश्मसुसीधुगंधिललनावक्त्रासवामोदितैर्नीत्वानिर्भरमन्मथोत्सवरसैरुन्निद्रचंद्राःक्षपाः।सर्वज्ञाइतिदीक्षिता
इतिचिरप्राप्ताग्निहोत्राइतिब्रह्मज्ञाइतिंदिवाधूर्त्तैर्जगद्वंच्यते॥ ॥ ॥श्रीरामचंद्र॥ ॥४१तापसाइति४१॥ ॥ ॥

तोपलः क्रियतां अल्पयत्नेननभवतीतिभावः।यथानिर्दिष्टः यथावत्पोक्तं आदेशआज्ञा।मदधिष्ठितैरितिंमयादंभेनअधिष्ठितैर्दंभि
कैरित्यर्थः।वेश्येति।धूर्त्तैर्वंचकैर्दिवादिनएवजगत्नरनारीसमुदायात्मकंइतिअनेनप्रकारेणसर्वज्ञत्वादिव्यपदेशेन वंच्यतेप्रता
र्यते।किंकृत्वा वेश्यावेश्मसुवारविलासिनीमंदिरेषुक्षपाःरात्रीः नीत्वापरिकल्प्य।कीदृश्यः क्षपाः उन्निद्रः प्रकाशयुक्तः प्रकटः चंद्रो
यासुताः।कीदृशैः धूर्त्तैः।सीधुमद्यं तद्गंधोपत्रतादृशंललनानांवक्त्रंकामिनीमुखंतत्रआसवोमादकद्रव्यविशेषः मदिरातयामोदितैः संतुष्टैः।पुनः कीदृशैः।निर्भरः अतिशयितः
मन्मथोत्सवेमेथुनेरसः प्रीतिर्येषांतैः।सुग
ममन्यत॥ ॥ ॥ ॥ ॥ ॥ ॥

प्रबो० यथैवरतिर्ज्वलन्निति।। पूर्वार्द्धं सुगमं। वाक्जालैरिति भर्त्सयन्नू जगत्त्रीमित्यत्रानुषंगः। उपहसन्नुपहासं कुर्वन्निनेनत्राप्यनुषंगो जगत्त्रयमि
१२ त्यस्यैतयेति। नूनं निश्चयेनायं दक्षिणराढप्रदेशादागतो भविष्यतीति तर्कयामीति योजना। वृत्तांतं समाचारं अनुसरिष्यामि ज्ञास्यामि।
नैवेति। नपशुभिः मनुष्यरूपैः पशुभिः गुरोः प्रभाकरस्य मतं नैवाश्रावि विनैव श्रुतं। तोतातितं दर्शनं कौमारिलं दर्शनं शास्त्रं न विदि
तं नैव ज्ञातमित्येवकारानुषंगः सर्वत्र। अहो रम्याश्चर्यं शालिकगिरां प्राभाकरमतावलंबिवाचां तत्त्वं अनारोपितरूपं स्वरूपं नैव

विलोक्य कोप्ययं पांथो भागीरथीमुत्तीर्य सांप्रतमित एवाभिवर्त्तते। यथैव रतिर्ज्वलन्निवाभिमानेन यत्सन्निव जगत्त्रयं भर्त्स ॥
यन्निव वाग्जालैः प्रश्रयोपहसन्निवा तथा तर्कयामि। नूनमयं दक्षिणराढप्रदेशादागतो भविष्यति। तदेतस्यौर्ध्यस्या ॥ ४८२४२
हंकारस्य वृत्तांतमनुसरिष्यामीति। ततः प्रविशत्यहंकारो यथा निर्दिष्टः। अहो मूर्खबहुलं जगत्। तथाहि। नैवाश्रावि
गुरोर्मतं न विदितं तौतातितं दर्शनं तत्त्वं ज्ञातमहो न शालिकगिरां वाचस्पतेः का कथा। सूक्तं नापि महोदधेरधिगतं मा
हाव्रती नेक्षिता सूक्ष्मा वस्तुविचारणा नृपशुभिः स्वस्थैः कथं स्थीयते।। वि

ष्णातं। वाचस्पतेः न्यायभाष्यव्याख्यातुः वेदांतभाष्यव्याख्यातुश्च का कथा न कापि वार्त्तेत्यर्थः। महोदधेः सूक्तं शेषप्रणीतभाष्य
स्य सूक्तं स्पष्टमपि नाधिगतं दुरुक्तं तु नसुतरां। महाव्रतं पाशुपतव्रतं तत्संबंधिनी महाव्रती पाशुपतशास्त्रसंहितिः नेक्षिता नैव
दृष्टा वस्तुविचारणा सूक्ष्मा वस्तु औपनिषदं ब्रह्म तद्विचारणा सूक्ष्मा दुर्विज्ञेयेत्यर्थः। एवं सति स्वस्थैः पंडितानामस्माकं १२
नाऽकिंचिद्विवेचनीयमस्तीति स्वस्यचित्तैः कथं स्थीयत इत्यर्थः। विलोक्य शुद्धवेदिकानिति शेषः।। ॥ ॥ ॥ ॥ ॥

अर्थावधारणविधुराः अर्थनिश्चयरहिताः। पुनरन्यतोगत्वा विलोकयेतिशेषः। भिक्षामात्रेति भिक्षामात्रार्थं गृहीतं पतिव्रतं यैस्ते भिक्षां मात्रं प्रयोजनं न मुक्तिः। गृहीतपतिव्रता न तु यतयः इत्यर्थः। मुंडितं मुंडं यैस्ते न तु मुंडितमनस इत्यर्थः। आत्मानं पंडितं मन्यंते ते पंडितंमन्या न तु पंडिता इत्यर्थः। प्रत्यक्षादीति। प्रत्यक्षादिप्रमाणासिद्धो योऽर्थस्तद्विरुद्धो योऽर्थः स्वर्गादिरूपस्तमभिदधती ये वंशीलाः वेदांताद्यादि शास्त्राणि तैर्हि नौ द्वैः किं अपराध्यते न किमपीत्यर्थः। तदेते रिति। नाऽस्मि श्रवणं वाचां मिश्रणं संभाषणमिति यावत्। दुरितोदयपापो

एतेतावदर्थावधारणविधुराः स्वाध्यायाध्ययनमात्रनिरताः वेदविप्लवकाएव। पुनरन्यतोगत्वा एते च भिक्षामात्रगृहीतपतिव्रताः मुंडितमुंडाः पंडितंमन्याः वेदांतशास्त्रं व्याकुलयंति। विहस्य प्रत्यक्षादिप्रमाणसिद्धविरुद्धार्थाभिधायिनः। वेदांताद्यादि शास्त्राणि नौ द्वैः किमपराध्यते। तदेतैर्वाऽस्मि श्रवणमपि गुरुतरदुरितोदयाय पुनरन्यतो गत्वा एते च शैवपाशुपतादयो दुरभ्यस्ताक्षपादमताः पशवः पारवंग एवं अमीषां संभाषणादपि नरा नरकं प्रयांति। तदेते दर्शनपथात् दूरं परिहरणीयाः पुनरन्यतो गत्वा एते च गंगातीरतरंगशीतलशिलाविन्यस्तभास्वद्दृशीसंविष्टाः कुशमुष्टिमंडितमहादंडाः कुरंगोज्वलाः॥ पण्यपिण्याधिताक्षसूत्रवलयप्रत्येकबीजग्रहव्यग्राग्रांगुल्यपोहरंति धनिनां वित्तान्यहो दांभिकाः॥

सत्तपो दुःखेनाभ्यस्तं अक्षपादमतं कणादशास्त्रं यैस्ते गंगातीरेति। अहो रसाश्चर्ये दांभिकाः दंभप्रधानाः धनिनां वित्तानि धनानि हरंति। कीदृशाः दांभिकाः गंगातीरे तरंगैः शीतलाः याः शिलाः तासु विन्यस्ताः प्रक्षिप्ताः याः भास्वद्दृश्यो कृष्णाजिनासनानि तेषु संविष्टाः॥ पुनः कीदृशाः कुशमुष्टिना मंडितः शोभितो महादंडो वृहद्भुजदंडो येषां तैः करंडैः धौतवसनस्थापनवंशपात्रैः उज्वलाः शोभमा

माध्वगिंडी तीर्थपात्री

द्वैत×२ ।। ।। ।।:२२५...

द्वैदं×२

प्रबो० एते चेति। त्रिदंडिव्यपदेशेन त्रिदंडिछलेन जीविनो द्वैतां मार्गपरिभ्रष्टाः भट्टभास्करमतावलंबनाद्भुमप्रभ्रष्टा इति भावः। अहंकारो वि
१२ चारयति।। अपेक्षस्येदमिति। अपेइति संबोधनं। अहो इत्यर्थेपरि दृश्यमानं अमरसरितो देवनद्या गंगायाः नातिदूरतः निकटे एव वक्र
स्याश्रमपदं विभाति शोभते।। कीदृशं आश्रमपदं। द्वारोपांते द्वारनिकटभूमौ निखातमारोपितं अतिप्रांशु अत्युच्चं पद्दंशकांडं तस्मि
स्तांडवितं नर्तितं धौतं प्रक्षालितं सितं श्वेतं सूक्ष्मं च बहुमूल्यं अंबरसहस्रं वस्त्रसहस्रं यस्मिन्तत्। पुनः कीदृशमाश्रमपदं इ
पुनरन्यतो गत्वा एते च त्रिदंडिव्यपदेशजीविनो द्वैता द्वैतमार्गपरिभ्रष्टाः। पुनरन्यतो गत्वा विलोक्य अपेक्षस्येदं द्वारोपांत
निखातातिप्रांशुवंशकांडतांडवितधौतसितसूक्ष्मांबरसहस्रमितस्ततो विन्यस्तकृष्णाजिनदर्भदुपलचमसचषा
३४ हुताशन×२ लोलूखलमुसलमनवरतहुताज्यगंधिधूमश्यामलीकृतगगनमंडलममरसरितो नातिदूरतो विभात्याश्रमपदं। नूनमदः
कस्यापि गृहमेधिनो गृहं भविष्यति तन्नतु। पुच्छमस्माकमति पवित्रमेतद्वित्रिदिवसनिवासाय स्थानं प्रवेशं नाटयति।।
विलोक्य अयेमद्विंदुलांछितललाटभुजोदरोरःकंठोष्ठपृष्ठचिबुकोरुकपोलजानुः। चूडाग्रकर्णकटिपाणिविराजमा
नदर्भांकुरः स्फुरति मूर्तइवैषदंभः।। ।।
तस्ततो विन्यस्तानि स्थापितानि कृष्णाजिनमारभ्यमुसलांतानि यस्य पात्राणि यस्मिन्तत्। पुनः कीदृशमाश्रमपदं अनवरतं निरंत
रं हुतस्याज्यस्य गंधो यस्मिन्नेतादृशो यो धूमः तेन श्यामलितं श्यामीकृतं गगनमंडलं यस्मिन्। नूनमिति। अदः इदं गृहमेधिनो गृहस्थस्य।।
दंभमजानन्नाह। मद्विंदुरिति। एषो दंभः मूर्त इव मूर्तिमानिव स्फुरति मम प्रतिभाति। कीदृशः। मद्विंदुभिर्नानाभिस्तैर्वर्तुलतिलकैः लां

छिताविविदिताभिलालसाधीनजनावनताभिः
स्फसः। पुनः कीदृशं। कुशोपशोभितव्याकेवर्कतिपाक्षा

[illegible]

अवतूपसर्प्पामि येनमिमारभ्य यत्र श्रोत्रियाभिरामं तं सुगामं यत्रेति। अतिथीन् अनागतपूर्वान्। तत्रापि श्रोत्रियान् गृहिणो गृहस्थाः नोपतिष्ठ
ति न संमुखमायांति। बटुर् इमशिष्यः वदतीति शेषः। गौडमिति। गौडं राष्ट्रदेशं अनुत्तमं न विद्यते उत्तमं यस्मात् तदनुत्तमं तत्रापि राढनगरीनि
रुपमा। तत्र राढपुर्यां भूरिश्रेष्ठिक इति नाम यस्य तस्य परमं धाम उत्कृष्टं गृहमस्तीति शेषः। तत्र तस्मिन् धाम्नि नोस्माकं पिता उत्तमः उत्कृ
अवतु उपसर्प्पामि येन उपसृप्त इक त्यागं भवतां। दंभः। हुंकारेणैव तं वारयति। प्रविश्य बटुः ससंभ्रमं ब्राह्मन् दूरत एव स्थीयतां।
यतः पादौ प्रक्षाल्य एतदाश्रमपदं प्रवेष्टव्यं। अहंकारः। सक्रोधं। आः पाप तुरुष्कदेशं प्राप्तास्मः। यत्र श्रोत्रिया नातिथीन् आ
सनपाद्यादिभिर् उपगृहिणो नोपतिष्ठंति। दंभः। हस्तसंज्ञया समाश्वासयति। बटुः एवमाराध्यपादा आज्ञापयंति। दूरदेशा
४५ तेनताडिताः ५४ दागतस्यार्यस्य कुलशीलादिकं न सम्यगस्माकं विदितं। अहंकारः। आः कथमस्माकमपि कुलशीलादिकमिदानीं परीक्षि ४सक्रोधं४
तव्यं संवृत्तं। गौडं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढापुरी भूरिश्रेष्ठिक नाम धाम परमं तत्रोत्तमो नः पिता तत्पुत्राश्च महा
कुला न विदिताः कस्यात्र तेषामपि प्रज्ञा शील विवेक धैर्य विनयाचारै रहं चोत्तमः। दंभः। बटु पश्यसि। बटुः। ताम्रपात्रीं
गृहीत्वा भगवत्पादशौचं विधीयतां। अहंकारः। स्वगतं। भवतु को विरोधः एवं क्रियते। तथा कृत्वोपसर्प्पति। दंभः।
दंतान् पीडयित्वा दूरे तावत् स्थीयतां। वाताहताः प्रस्वेदकणिकाः प्रसरंति। अहंकारः। अहो अपूर्वमिदं ब्राह्मण्यं। बटुः।
ष्टः उत्तमापरनाम को नास्तीति शेषः। तत्पुत्रा महाकुलाश्च अत्र जगति कस्य न विदिताः अपि तु सर्वस्यैव विदिता इत्यर्थः। तेषां पुत्राणामपि
मध्ये अहं प्रज्ञा बुद्धिः शीलं स्वभावः विवेकः पांडित्यं धैर्यं धीरता विनयो नम्रता आचारश्च सदाचारः एतैर् गुणैरुत्तमः सर्वोत्कृष्टः

[illegible]

[illegible]

अस्पृष्टेति। हिमिश्वितं भूपालाः राजानः अस्पदंत्रस्य पादपीठस्य अंते अवसाने निकटे भूतलं भूमागं चूडामणिमरीचिभिः मुकुटमाणि
क्यरश्मिभिः नीराजयंति। आरात्रिकक्रियया उपचरंति। कीदृशाः भूपालाः अस्पृष्टचरणाः नस्पृष्टो चरणो यैस्ते। चरणस्पर्शरहिताइत्य
र्थः। एतेन राजपूज्याभिबंधनमेवब्राह्मणत्वं न विद्यातपोवृत्तैर्दांभिकानामितिभावः। अहंकार इत्याधारभ्यश्रुणुरे मूर्खेरइतंतं सुबोधं॥
सुबोधमध्ये परेषामासनोपवेशने अहंकारोऽपनाचारीति मे वमाराध्यपादानामिमुने नध्वमितं नास्माकमितिं अस्माकं जन
× उत्कृष्टकुलाय नीमाता तथाउज्वलकुलीना। मया पुनः समीचीनश्रोत्रियाणां कन्या व्यूढा परिणीता तेन कारणेन अहं नाताधिकः पित्राधि
अस्पृष्टचरणाह्यस्य चूडामणिमरीचिभिः। नीराजयंति भूपालाः पादपीठांतभूतलं। अहंकारः स्वगतं। अपेदं मनाह्यो
पदेशः। भवत्वस्मिन्नासने उपविशामि। तथा कर्तुमिच्छति। वटुः। मे वमाराध्यपादानामासनमन्येराक्रम्यते। अहंका
रः। आः पाप अस्माभिरपि दक्षिणराढाप्रसिद्धविशुद्धिभिरिदमासनमनाक्रमणीयं श्रुणुरे मूर्ख। नास्माकं जननीतथो
ज्वलकुला सच्छ्रोत्रियाणां पुनर्व्यूढा का च न कन्यका खलु मया। तेनास्मि ताधिकः। अस्मद्यालकमित्रमातुलसुता
मिथ्याभिशस्तापतस्तत्संपर्कवशान्मया स्वगृहिणी प्रेयस्यपि प्रोज्झितादं मः। ब्रह्मन्नपपद्यवे वं तथाप्यस्माकमविदित
वृत्तांतोभवानु। तथाहि॥ ॥ ज्झि x ता२
कः उत्तमैरुत्तमैर्नित्यं संबंधान्नाचरेद्बुधइतिस्मरणात्संबंधकृतमुत्तमत्वं। आचारातिशयं दर्शयति। अस्माकं शालको अस्मच्छा
लकः तस्य मित्रं तस्य मातुलो मातुर्भ्राता तस्य सुता कन्या सा पतिता हेतोः मिथ्याभिशस्ता मिथ्याभिशापयुक्ता तत्संपर्कवशात् परंप
× ता२ रासंबंधात् मया प्रेयस्यपि प्रेमास्पदमपि स्वगृहिणी प्रोज्झिता त्यक्ता॥ ॥

सदनमिति। अहं पूर्वं अंभोजयोनेर्हिरण्यगर्भस्य सदनं गृहं प्रति उपगतः ब्रह्मणा हिरण्यगर्भेण गोमयांभः परिमार्जितनिजोरो गोमययु
क्तेनांभसा जलेन परिसमंतान्मार्जितः शोधितो यो भित्तः स्वीयउरः अंकस्तस्मिन् सशपथं यथा स्यात्तथा अनुनीयमानपि त्वाउपवेशितः॥
केषु सत्सु उच्चैरतिशापेन मुनिभिः सपदि तत्क्षणे एव आसनेषु उज्झितेषु सत्सु एतेन हिरण्यगर्भस्यापि वयं मान्याः किंपुनर्मनुष्या
णामिति व्यज्यते। मत्तपोविजृंभितमिदमिह्यहं अहंकारः। अरे करवर्ति अरे इति नीचसंबोधने वासवः शतक्रतुः करवनक्रो पीयर्पः। अहल्या

> सदनमुपगतोहं पूर्वममंभोजयोनेः सपदि मुनिभिरुच्चैरासनेषूज्झितेषु सशपथमनुनीय ब्रह्मणा गोमयांभः परिमार्जितनिजो
> रावाश्रुसंवेशितोस्मि। अहंकारः स्वगतं। अहो दांभिकब्राह्मणस्यासूक्तिः विचिंत्य। अथवा दंभस्यैव भवत्वेवं तावत्। सक्रो
> धं प्रकाशं आः किमेवं गर्वायसे। अरे करववासव कथय कोत्र पद्मजन्मा वद प्रभवभूमयो जगति कान्यषीणामपि। अवेहि
> तपसो बलं मम पुरंदराणां शतं शतं च परमेष्ठिनां पततु वा मुनीनां शतं। दंभः विलोक्य। सानंदं। अये आर्यः पितामहोस्माक
> महंकारः। आर्य दंभो लोभात्मजोहं भो अभिवादये॥ ॥

गामित्वादिति ध्वनितं। अत्र जगति पद्मोद्भवो ब्रह्मा क इति कथय स्वकन्यागामित्वादिति तात्पर्यं। जगति ऋषीणामपि मंत्रद्रष्टॄणामपि प्र
भवभूमयः उत्पत्तिभूमयः काः कथय। धीवरकन्यातो व्यासः कुंभसंभवोगस्त्यः हरिण्याः ऋष्यशृंग एवमादीन्युत्पत्तिस्थानानीति ध्वनि
तं। रदशं मम तपसः सामर्थ्यमस्तीत्याह। अवेहीति। मम तपसो बलं अवेहि जानीहि किं तत्त दाह। पुरंदराणां इंद्राणां परमेष्ठिनां ब्रह्मणां मु
नीनां मननशीलानां प्रत्येकं शतं पततु मत्तपः सामर्थ्यात्॥ सर्वमाहंकारिकमिति भावः॥

चिरकालविप्रकर्षाद्धेतुकालविलंबात् प्रत्यभिजानामि परिचिनोमि। अथेप्रादिः प्रसादः कृतरसंतोग्रंथस्य स्पष्टार्थः। वत्समयेति। असाहितं
असमिष्टं अतिआसमंतात् अहितं असाहितमित्यर्थः। तद्वृत्तांतं महामोहसमाचारं प्रष्टेतुं सांतु। स्वांतमेव सुहृद्वत् आगतां राजधानीरा
अहंकारः। वत्स आयुष्मान्भव बालः खल्वसि मयाद्यापरां ते दृष्टः संप्रति चिरकालविप्रकर्षात् वार्द्धक्यस्तैन्याच्च न सम्यक्प्र
त्यभिजानामि। अथ वत्सकुमारस्यापि तस्य कुशलं दंभः। अथ किं सोप्यत्रैव महामोहस्यान्तया वर्त्तते। अथ तव माता पितरौ
तृष्णालोभौ च अपि कुशलौ दंभः। तावप्यत्रैव वर्त्तेते तयोर्विनाक्षणमपि न तिष्ठामि। आर्यमिश्रैः पुनरत्र केन प्रयोजनेन प्रसा
दः कृतः। अहंकारः। वत्स मया महामोहस्य विवेकसकाशात् असाहितं श्रुतं तेन तद्वृत्तांतं प्रष्टुमागतोस्मि दंभः। तर्हि स्वाग
तमेव आर्यस्य यतो महाराजस्यापि इंद्रलोकादागमनं श्रूयते। अस्ति च किंवदंती यद्देवेन वाराणसी नाम नगरी राजधानी
निरूपितेति। अहंकारः। किं पुनः कारणं वाराणस्यां स्वांतमिनाम महामोहस्यावस्थानं दंभः। आर्य ननु विवेकोपरोध एवं तथाहि।
व
जानोधीयंतेवसंसस्यामिति राजधानी राजेत्सतिः। ममापि सैव वसतिस्थलमिति निरूपिता विचारिता तत्रैव स्थातव्यमिति
भावः। विवेकस्य उपरोधः प्रतिघातः विवेकोपरोधः स्यावश्यकोपतः विवेकस्तस्यां निरंतरं निवासमिच्छति वाराणस्यां
मित्याह। तथाहीति॥ ॥ रामकृष्णाजी॥ ॥ ॥ ॥ ॥

वाराणसीवासयोग्योविवेक एवेत्याह॥ विद्येति॥ सविवेकः अतोहेतोः अत्रवाराणस्यांनियममेवसर्वदैवनिवस्तुं नितरांवासंकर्तुं इच्छति॥ कीदृ
शोविवेकः॥ कुलोच्छेदविधिं कुलोच्छेदकर्त्तव्यतांविधित्सुः विकीर्षुः॥ अतः कुतः यतोहेतोः दुरत्यया अविनाशा ब्रह्मपुरी शिवनगरी वाराण
सीति ब्रह्मशब्दः शिववचनः उक्तं च ब्रह्मस्थानं प्रधानं च क्षेत्रज्ञो ओंकार बुद्धयः मोक्षो हिरण्यगर्भश्च मंत्रो वेदः शिवस्येति॥ कीदृशी वारा
णसी विद्याप्रबोधोदयजन्मभूमिः विद्या च प्रबोधश्च तयोरुदयः तस्य जन्मभूमिः॥ विद्या ब्रह्माकारांतःकरणवृत्तिस्तद्दृसुपहितं चैतन्यं प्र
बोधः तयोर्जन्मभूमिरित्यर्थः। यद्येवमिति॥ यद्द्वि एवं विधा वाराणसीति शेषः। तर्हि अयमर्थो अशक्यप्रतिकार इति योजना॥ अशक्य

लोद्योजिताकांडचंडांबुवाहातिवर्षात्रसद्गोकुलत्राणविस्मापिताशेषविश्व। प्रभो। विबुधरिपुवधूवर्गसीमंतसिंदूरसंध्याम
यूखच्छटोन्मार्जनोद्दामधामाधिप। त्रस्तदैत्येंद्रवक्षस्तटीपाटनाकुंठभास्वन्नखश्रेणिपाणिद्वयस्रस्तनिस्तारिरक्तार्णवा
मग्नलोकत्रय। त्रिभुवनरिपुकैटभोद्दंडकंठास्थिकूटस्फुटोन्मार्जितोद्दामचक्रस्फुरज्ज्योतिरुल्लासितोड्डामरोद्दंडदोर्दंड॥

संबोधनेहेअधिप। त्रस्तोभीतोदैत्येंद्रोहिरण्यकशिपुस्तस्यवक्षस्तटीपाटनेविदारणेअकुंठाअप्रतिहताभास्वतीदीप्तिमतीनखश्रेणिःपंक्ति
र्यस्यतादृशंयत्पाणिद्वयंतस्मात्स्रस्तंअधःपतितंनिःसारिप्रसरणशीलंयद्रक्तंतस्यअर्णवःसागरःतस्मिन्नासमंतान्मग्नंलोकत्रयंयेन।
त्रिभुवनस्यरिपुर्यःकैटभोदैत्यःतस्यउद्दंडोस्थूलोयःकंठःतस्यास्थिकूटंअस्थिसंघस्तस्मिन्स्फुटंस्पष्टंउन्मार्जितंशोधितंउद्दामंख्यातंय
च्चक्रंसुदर्शनंतस्यस्फुरद्दीप्यमानंयज्ज्योतिस्तेनउल्लसिताउद्दीप्ताउड्डामराउद्भटाः उद्दंडाःश्रेष्ठावरोदोर्दंडाबाहवोयस्य॥ ॥६॥ ॥

खपेंदुचूडोमहादेवः प्रियोयस्य। प्रौढो अतिवलोयोदोर्दंडोबाहुदंडस्तेनविभ्रांतः भ्रामितोयोमंथाचलः मंदराद्रिः तेनक्षुब्धोदुग्धांबुधिः
दुग्धसमुद्रः तस्मादुत्थिता आविर्भूतायाश्रीः लक्ष्मीस्तस्यायाभुजवल्लिः तत्संश्लेषेण आलिंगनेन संक्रान्तापीनस्तनयोरभोगेविशालेस्थ
लेयापत्त्रावलीपत्त्रलेखातयालांछितमुरः स्थलंयस्य। स्थूलानियानिमुक्ताफलानितेषामुदारश्चासौहारश्चतस्यप्रभामंडलेनस्फुरन्
कंठोयस्यवैकुंठपरमात्मन्। भक्तस्यलोकस्यजनस्ययः संसारस्तदुपानंमोहः भावरूपमज्ञानंछिन्नत्तीतिछित्तंबोधोदयंब्रह्मलाद्वैतसा
खदेंदुचूडप्रिय। प्रौढदोर्दंडविभ्रांतमंथाचलक्षुब्धदुग्धांभोधिपोत्थितश्रीभुजवल्लिसंश्लेषसंक्रांतपीनस्तनाभोगपत्त्रावली
लांछितोरः स्थल। स्थूलमुक्ताफलोदारहारप्रभामंडलस्फुरत्कंठवैकुंठ। भक्तस्यलोकस्यसंसारमोहछिदंदेहिबोधोदयं
देवतुभ्यंनमः। निर्गमंनाटयित्वाविलोक्यच। साधुरयमेवास्माकंनिवासोचितोदेशः। तदत्रैवस्कंधावारंनिवेशयामइतिनि
ष्क्रांतो।। इतिनिर्विकोद्योगोनामचतुर्थोंकः।। ।। ततःप्रविशतिश्रद्धा।। विचित्परवत्वयंप्रसिद्धःपंथाः।। राम।।
क्षात्कारोदयंदेहि देवस्वप्रकाशतुभ्यंनमोस्तु नाटयित्वाभ्रमणविशेषेणप्रदर्शयित्वेत्यर्थः। स्कंधावारंकटकंनिवेशयामः।। इतिनिष्क्रांतोविवेक
सारथिनावितिशेषः।। ।। इतिप्रबोधचंद्रोदयव्याख्यानेप्रकाशाख्येविवेकोद्योगोनामचतुर्थोंकः।। ।। इत्थंचतुर्थेविवेकोद्यो
गमुक्त्वावैराग्योत्पत्तिंवर्णयितुंपंचमेंकेश्रद्धायाःप्रवेशस्तोतिततःप्रविशतिश्रद्धेति।। परस्परप्रतिस्पर्द्धिनोःसंग्राममंसूचयंतीआह।
प्रसिद्धइति।। ।।९५।।

प्र॰टी॰
८५

अयमित्यनेनोक्तं पंथानं विदर्शयति। यतोनिर्दहतीति वैरात्संभवउत्पत्तिर्यस्यएतादृशोयः क्रोधः सज्ञातीनामशेषं समस्तं कुलं निर्दहतीति। तत्रदृष्टां
तः। घनः प्रचंडोयः पवनोवायुस्तेन आहताआंदोलितायेतरुवराः स्थूलवृक्षाः तेषांसंघट्टनेन संघर्षेण संभवोजन्मयस्यसः तादृशोदहनोग्निःव
नमिवनिर्दहतीत्यर्थः। उक्तंचमहाभारते। धूमायंतेव्यपेतानि ज्वलंति सहितानि च। उल्मुकानीव भांति स्वा ज्ञातयो भरतर्षभेति। सोदराणांवधू
नांव्यसनंमरणं तस्माज्जन्मयस्यसः शोकएवानलोग्निः। विवेकएवजलधरामेघास्तेषांशतानितैः। एतदेवस्पष्टयति। ध्रुवमिति। जलनिधय

यतो। निर्दहति कुलमशेषं ज्ञातीनांवैरसंभवः क्रोधः। वनमिवघनपवनाहततरुवरसंघट्टसंभवोदहनः। सास्त्रं अहोदुर्वारोदारुणः
सोदरव्यसनजन्माशोकानलोयोविवेकजलधरशतैरपिनमंदीक्रियते। तथाहि। ध्रुवंध्वंसोभावीजलनिधिमहीशैलसरितामतो
मर्त्योःशीर्यत्तृणलघुषुकाजंतुषुकथा। तथाप्युच्चैर्बंधुव्यसनजनितः कोपिविषमोविवेकप्रोन्माथीदहतिहृदयंशोकदहनः॥
येनतथाक्रूरप्रकृतिकेष्वपिभ्रातृषुकामक्रोधादिषुकथाशेषतांगतेषु॥ ॥

श्चसमुद्राः महीचशैलाश्चपर्वताः सरितश्चनद्यस्तासांस्थिराणामपिध्रुवंनिश्चयेनध्वंसोनाशोभावीभविष्यति। अतोहेतोः शीर्यत्शरितंयत्तृणंतद्व
ल्लघुषुअतितुच्छेषुजंतुषुप्राणिषुमर्त्योर्म्मरणस्यकाकथा किंवक्तव्यमित्यर्थः। तथापिएवंविवेके जातेपिउच्चैरतिशयेनकोप्यनिर्वाच्यः।
विषमोअसत्यः विवेकंप्रकर्षेणोन्मथ्नातिनाशयतितादृशः बंधूनांव्यसनेनजनितः शोकएवदहनोग्निः हृदयंचेतोदहति कामादिवधस्य
नाघप्रत्यक्षः कर्तुमशक्यत्वात्। श्रद्धामुखेनतंसूचयति। येनतथेति। कथावार्त्तासैवशेषोऽवशिष्टभागस्तस्यभावस्ततांगतेषुप्राप्तेषु
मतेष्वित्यर्थः। ६१। राम॥ ॥ राम॰

८५

निकृंततीवेति। क्रूरः असह्यः शोकाग्निः ऊर्द्ध्वाः शिखाः यस्य उदरपूरकत्वादुच्छिखः मम मर्म्माणि निकृंततीव छिनत्तीव देहं शरीरं शोषयतीव अंत
रात्मानं मनो दहतीवेत्यर्थः। कामादिवधं पूर्वं सूचितं प्रकटयितुं विष्णुभक्तेः प्रवेशं सूचयति। आदिष्टेत्यादि। विष्णुभक्तिर्नाम जगन्तांक्का
रादिरहिता ज्ञानसत्यानंदघाकारा प्रत्यक्षेतो वृत्तिः। हिंसाप्रायः वधप्रधानो यः समरः संग्रामः तद्दर्शनपराङ्मुखी उदासीना। शालग्रामाभि
धाने चक्रतीर्थे भगवतो विष्णोः क्षेत्रे अतिपालयामि अतिक्रमामि। यथावृत्तं येन प्रकारेण जातं वृत्तांतमिति शेषः। आवेदयामि आवेदयि

निकृंततीव मम मर्म्माणि देहं शोषयतीव मे। दहतीवांतरात्मानं क्रूरः शोकाग्निरुच्छिखः॥ विचिंत्य। आदिष्टास्मि देव्या विष्णुभक्त्या। वत्से श्र
द्धे अहमत्र हिंसाप्रायसमरदर्शनपराङ्मुखी तेन वाराणसीमुत्सृज्य शालग्रामाभिधाने भगवतः क्षेत्रे किंचित्कालमतिपालयामि॥
त्वं तु यथावृत्तमागत्य मे विवेदयिष्यसीति। तदहं देव्याः सकाशं गत्वा सर्वमेतत् समरवृत्तांतमावेदयामि। परिक्रम्यावलोक्य च। एतच्च
क्रतीर्थं यथायं संसारसागरोत्तारतरणिकर्णधारो भगवान् हरिः स्वयं प्रवसति। प्रणम्य इयं च महामुनिभिरुपास्यमाना भगवती वि
ष्णुभक्तिः शांत्या सह किमपि मंत्रयते। यावदुपसर्प्पामीति परिक्रामति। ततः प्रविशति विष्णुभक्तिः शांतिश्च। शांतिः। देवि प्रब
ल चिंताकुलहृदयामिव भगवतीमवलोकयामि। विष्णुभक्तिः॥

ष्यामि। यत्रेति। यत्रतीर्थे संसारसागरस्य समुद्रस्य उत्तारे पारगमने तरणिः नौका। स्त्रियां नौस्तरणिस्तरिरित्यमरः। ज्ञानरूपा तस्याः कर्णधा
रो नियामकः। महामुनिभिर्न्नारदशुकपाराशरादिभिः उपास्यमाना सेव्यमाना उपास्यमानेत्यनेनेदमुक्तं यन्नानाविधा भक्तिरेव परमार्थ
साधनं उपायांतरं नास्त्येव कलौ विक्षिप्तमनसां तु सुतरां। भक्त्यैव अनेके संतीर्णाः तथोक्तं। विष्णोः श्रवणे परिक्षितिरभूद्वैयासकिः की
र्तने प्रह्लादः स्मरणे तदंघ्रिभजने लक्ष्मीः पृथुः पूजने। अक्रूरस्त्वभिवंदने च हनुमान् दास्ये च सख्येऽर्जुनः सर्व्वस्वात्मनिवेदने बलिरभूत्केव

प्रबोधचंद्रटी॥

प्र॰टी॰
९६

सांपराये संग्रामे। अभियुक्तस्य तिरस्कृतस्य दुःस्थितमिव सचिंतमिव मे हृदयं मानसं। नियतमेव निश्चितमेव। यद्यपीति। यद्यपि प्रायो बाहुल्येन अ
भ्युदयो भाग्योत्कर्षः प्रमाणाद्धर्मपक्षपातित्वादवधार्य्यते निर्णीयते तथापि कामम् अत्यर्थं सुहृदां मानसं अनिष्टाशंकि अनर्थाशंकीत्यर्थः। विशे
षत इत्यादि विष्णुभक्तोरित्यादि सुबोधं। सुबोधांतर्द्दश्याः विष्णुभक्ते रिति ज्ञेयं। चेतः पदं अंतःकरणरूपं स्थानां मोहविवेकयोः संग्राममनुवर्ण्

वत्से एतस्मिन्नतिमहति सांपराये नजाने बलवता मोहेनाभियुक्तस्य वत्सस्य विवेकस्य कीदृशो वृत्तांत इति दुःस्थितमिव मे हृदयम्। शांतिः
किमत्र विचिंत्यं। ननु भगवती चेत्कृतानुग्रहात्तन्नियतमेव राज्ञो विवेकस्य विजय इति जानामि। विष्णुभक्तिः। वत्से। यद्यप्यभ्युद
यः प्रायः प्रमाणादवधार्य्यते। कामं तथापि सुहृदामनिष्टाशंकि मानसम्। विशेषतश्च श्रद्धायाश्चिरमनागमनं मनसि संदेहमा
रोपयति। श्रद्धा। उपसृत्य भगवति प्रणमामि। विष्णुभक्तिः। श्रद्धे स्वागतं। श्रद्धा। देव्याः प्रसादेन। शांतिः। अंब प्रणमामि। श्रद्धा।
पुत्रि मां परिष्वजस्व। शांतिः। तथा करोति। श्रद्धा। वत्से देव्या विष्णुभक्तेः प्रसादान्मुनिजनचेतः प्राप्नुहि। विष्णुभक्तिः। अथ तत्र किं
वृत्तं। श्रद्धा। देव्याः प्रतिकूलमाचरताम् उचितं। विष्णुभक्तिः। तद्विस्तरेणावेदय। श्रद्धा। आकर्णयतु भवती। देव्यामादिकेश
वायतनादपक्रांतायामेव किंचित्स्पष्टपाटलिम्नि भगवति भास्वति।।

पिष्पस्विष्णुभक्तिश्रद्धयोः प्रश्नोत्तरे अवतारयति। अत्र तत्रेति। देव्यां विष्णुभक्तौ। आदिकेशवायतनात् गंगावरुणासंगमात्। अप
क्रांतायां च क्रतीर्थं प्रतिगतायामेव कस्मिन्सति भगवति भास्वति अतिसमर्थे श्रीसूर्ये किंचिदुत्स्पष्टः पाटलिमा श्वेतरक्तिमा येन तस्मि
न्सतीत्यर्थः।।६७।।

राम॰
९६

विजयेत्यादि तेषामित्यादि वच पुनः तेषां महामोहपक्षे वर्त्तमानानामस्माकं विवेकपक्षीयानां सैन्यसागरे सैन्यसमुद्रे सन्नद्धे सन्नाहयुक्ते सति
महाराजेन विवेकेन महाराजमहामोहस्येति कर्म्मणि षष्ठी तं प्रति नैयायिकदर्शनं दौत्येन दूतस्य कर्म्म दौत्यं तेन प्रहितं प्रेषितमिति संबंधः। की
दृशे सैन्यसागरे विजयघोषेण विजयवाद्यशब्देनाहूयमाना अनेके बहवो ये नराः श्रेष्ठाः वीराः योद्धारः तेषां बहलोयः सिंहनादस्तेन बधिराः सं
पादिताः दिशामंतायेन तस्मिन्पुनः कीदृशे सैन्यसागरे सततं निरंतरं यथा श्वतुरगखुराः श्वतैः खंडितं चूर्णितं यद्भूमंडलं तस्मादुच्छलदूर्ध्वं यद्वि
पुलं रजःपटलं धूलीसमूहः तेनांतरितआच्छादितः किरणमाली तरणिर्येन तस्मिन्। पुनः कीदृशे सैन्यसागरे प्रबलतरं यत्कर्णतालास्फालनं तेन
उच्छलत उद्गच्छत् करिकुंभसिंदूरं तेन सध्यायमानाः संध्यातुल्या दशदिशो येन तस्मिन्। पुनः कीदृशे सैन्यसागरे प्रलयकालीनाजलधरा मेघा

विजयघोषेणाहूयमानानेकवरवीरबहलसिंहनादबधिरितदिगंते। सततरयतुरंगखुरखंडितभूमंडलोच्छलद्विपुलरजःपटलांत
रितकिरणमालिनि। प्रबलतरकर्णतालास्फालनोच्छलत्करिकुंभसिंदूरसंध्यायमानदशदिशि। प्रलयजलधरध्वानभीषणे। तेषाम
स्माकं च सन्नद्धे सैन्यसागरे। महाराजमहामोहस्य महाराजेन नैयायिकदर्शनं दौत्येन प्रहितं। गत्वा च तेनोक्तो महामोहः। विष्णा
रायतनान्यपास्य सरितां कूलान्यरण्यस्थलीः पुण्याः पुण्यकृतां मनांसि च। भवान्म्लेच्छान्व्रजेत्सानुगः नो चेत्संतु कृपाणपाटित
भवत्प्रत्यंगधाराक्षरद्रक्तस्फातविदीर्णवक्त्रविवराः फेत्कारिणः फेरवाः॥

स्तेषामिव ध्वानः शब्दः तेन भीषणो भयानके। दूतेन किमुक्तं तदाह। विष्णोरिति। हे महामोहे त्वं ध्याहारः। भगवान्सानुगः अनुगैः कामक्रोधा
दिभिः सहितम्लेच्छान्म्लेच्छदेशान्व्रजेत् गच्छतु। किं कृत्वा। विष्णोरायतनानि स्थानानि शालग्रामक्षेत्राणि सरितां गंगादीनां कूलानि तीरा
णि पुण्याः पावनाः अरण्यस्थली नैमिषारण्यभूमीः पुण्यकृतां याज्ञिकानां मनांसि अपास्य परित्यज्येति सर्वत्र संबंध्यते। नो गच्छसि चेत्
फेत्कारिणः फेत्कारशब्दयुक्ताः फेरवाः शृगालाः कृपाणेन खड्गेन दारितं छिन्नं भवतो यत्प्रत्यंगं तस्माद्धारया क्षरत् निर्गच्छत् यद्रक्तं तेन स्फीता

तत। स्ततः पुनरित्यर्थः। ततइति। विकटाविषमाललाटफलके तांडवितानर्त्तिताभ्रकुटिः भ्रूर्येनमहामोहेनाऽभिहितंउक्तम्। किमुक्तं तदाह अनुभ
वत्विति। दुर्न्नयोदुर्नीतिः तस्याः परिपाकः फलंतस्यविवेकहतकः विवेकप्रेतः। पाखंडागमाः सुगतचार्वाकयोगाचारजैनकापालिका
द्यागमास्तेषांपाखंडतर्कप्रतिपादितानिशास्त्राणितैः सहसमराय संग्रामायसमुद्योजिताउद्योगवंतः कृताः। अत्रेति। अत्रांतरेएतस्मिन्ने
वसमये। सैन्यशिरसि सैन्यमस्तके। वेदेति। सरस्वतीसहसाअकस्मात् आविरासीत्प्रकटीबभूव। कीदशी सरस्वती। वेदाश्चत्वारः उपवे

विष्णुभक्तिः। ततस्ततः। श्रद्धा। ततोदेवि विकटललाटतटतांडवितभ्रकुटिनाक्रोधेनमहामोहेनाभिहितं। अनुभवत्वस्यदुर्न्नय
परिपाकस्यविवेकहतकः फलमित्यभिधायस्वयंपाखंडागमाः पाखंडतर्कशास्त्रैः समंसमरायप्रथमंमुद्योजिताः। अत्रां
तरेचास्माकमपिसैन्यशिरसि। वेदोपवेदांगपुराणधर्मशास्त्रेतिहासादिभिरुच्छ्रितश्रीः। सरस्वतीपद्मकराशशांकसं
काशकांतिः सहसाविरासीत्। विष्णुभक्तिः। ततः ततः। श्रद्धा। ततोदेवि वैष्णवशैवसौरादयोदेव्याः सकाशमागताः। वि
ष्णुभक्तिः। ततः २। श्रद्धा। तदनंतरंच॥ ॥

दाः आयुर्वेदधनुर्वेदगांधर्वार्थशास्त्राणि। अंगानि शिक्षाकल्पोव्याकरणंनिरुक्तंछंदोज्योतिषमिति आगमाः नारदपंचरात्ररुद्रयाम
लइत्यादयः। पुराणानि अष्टादशमत्स्यमार्कंडेयादीनि। धर्मशास्त्राणिमन्वादिस्मृतयोऽष्टादशतावत्युपस्मृतयः॥ इतिहासामहा
भारतादयः। आदिग्रहणात् पुराणवहिर्भूताः आगमानारदपंचरात्ररुद्रयामलस्तोत्रकवचादयः। उच्छ्रिताअतिशयिताश्रीः शोभा
यस्याः सा। पुनः कीदशी सरस्वती। पद्मकरेयस्याः सा। पाठांतरंपद्मंधरतीति वा। पुनः कीदशी सरस्वती। शशांकेनचंद्रमसा संकाशातु
ल्याकांतिर्द्दीप्तिर्यस्याः सा। ततइति। वैष्णवंअव्वात्सवादिनांदर्शनं। शैवंपाशुपतंशास्त्रं। सौरसौरागमः॥ ६७॥ ॥ ६७

सांख्यन्यायेति। वाग्देव्याः पुरतः अग्रे समराय उत्सुका उत्कंठा मीमांसा पूर्वोत्तरमीमांसा विचारप्रधाना भाट्टप्राभाकरशास्त्ररूपा आविरभवत् प्र
कटीबभूव। कीदृशी मीमांसा। सांख्यं प्रसिद्धं• न्यायो गोतमप्रणीतं शास्त्रो कणादेन भाषितं वैशेषिकं दर्शनं महाभाष्यादीनि शास्त्राणि तैर्वृतायु
क्तेत्यर्थः। पुनः कीदृशी स्फूर्जत्तोऽबाधिताः ये न्याया अधिकरणानि तेषां सहस्रं त एव वाहवो हस्तास्तेषां निकरैः समूहैः दिशः वैदिककर्म्म ब्र
ह्मबोधनमार्गान् उद्योतयंती प्रकटयंती। पुनः कीदृशी। धर्म एव इंदुस्तद्वत्कांतं मनोहरमाननं यस्याः सा। पुनः कीदृशी। त्रयी वेदत्रयी सैव त्रीणि
नयनानि नेत्राणि यस्याः सा। तत्रोत्प्रेक्षते। अपरद्वितीया कात्यायनी वत् तत्राप्येनां स्वारसिक विरोधिनां तर्कीणां शास्त्राणामागमानां चेति। आ

सांख्यन्यायकणादभाषितमहाभाष्यादिशास्त्रैर्वृतास्फूर्जन्न्यायसहस्रबाहुनिकरैरुद्योतयंती दिशः। मीमांसासमरोत्सुकाऽविरभ
वद्धर्मेंदुकांताननाग्देव्याः पुरतस्त्रयीत्रिनयना कात्यायनी वापरा। शान्तिः। अथ कथं पुनः स्वभावद्वेषिनामागमानां तर्की
णां च समवायः संपन्नः। श्रद्धा। पुत्रि। समानान्वयजातानां परस्परविरोधिनां। परैः प्रत्यभिभूतानां प्रसूते संगतिः श्रियं येन वेदप्र
सूतानां तेषामांतरविरोधेऽपि भेदसंरक्षणाय नास्तिकपक्षप्रतिक्षेपणाय शास्त्राणां साहित्यमेव।। ।।

गमानां वेदानां द्वे वाव ब्रह्मणी वेदितव्ये एकमेवाद्वितीयं ब्रह्म इत्यादीनां तर्कीणां शास्त्राणां च समवायो मेलकः कथं संपन्नो जातः। समा
धत्ते पुत्रीति। समानान्वयेति। समानान्वयजातानां समान एकोऽन्वयो वंशो वेदस्तस्मात्प्रभूतानां परस्परविरोधिनां। परैः साधारणश
त्रुभिः प्रत्यभिभूतानां पराभूतानां संगतिर्मेलनं श्रियं शोभां प्रसूते।। अनेन स्वपक्षरक्षणाय परपक्षाधिक्षेपरतिलक्ष्यते। ननु स्वतंत्र ऋषिप्रणी
तानां भिन्नमतावलंबिनां दर्शनानां कथमेकवंशप्रसूतत्वमित्याशंक्याह। येनेति। वेदमूलत्वं एकवंशप्रसूतत्वे बीजमिति भावः। साहित्यमे
व अविरोध एव।।

प्र० टी०
५८

ननु स्वतंत्रैऋषिप्रणीतानां शास्त्राणां पौरुषेयत्वाद्विरुद्धार्थाभिधायकत्वेऽन्यतरस्याप्रामाण्यप्रसंगाद्विरोधे चोभयस्याशास्त्रार्थत्वादुपपद्यते शा
स्त्रे क्वचिदिदं प्रमाणमिदं प्रमाणमिति विचारणा। अपौरुषेयासूपनिषत्सु द्वे वाव ब्रह्मणी वेदितव्ये। द्वा सुपर्णा सयुजा सखाया। एकमेवाद्वितीयं ए
तदात्म्यमिदं सर्वमित्यादि विरुद्धार्थत्वं कथं सोढुं शक्यम्। भ्रमप्रमादविप्रलिप्साकरणापाटवादिपुरुषदोषाणामभिरूपणादित्याशंक्य तत्र क्वचि
द्द्वार्थकत्वमेव नास्तीत्याह। आगमानामिति। तत्त्वं विचारयतां तत्त्वमद्वितीयं ब्रह्माखंडवाक्यार्थरूपं तद्विचारयतां तत्प्रतिपादकानां तथा च पद
र्थानां विरोधेऽपि वाक्यार्थस्यैकत्वान्न तत्र विरोधशंकाशूकमपीति भावः। उक्तार्थमाविः करोति। तथाहि। ज्योतिरिति। तैस्तैः प्रसिद्धैः सदागमैः
समीचीनैर्वैदिकपरिगृहीतैः आगमैर्नारदपंचरात्रादिभिः ज्योतिः ब्रह्मैव अनेकधा अनेकप्रकारं प्रसूयते उपास्यते। ते के प्रकारा इत्यपेक्षाया
माह। ब्रह्मेव तत्त्वमिति हैरण्यगर्भाः। अच्युत इति वैष्णवाः। उमापतिरिति शैवाः। नन्वेतान्येव पारमार्थिकानि नानातत्त्वानि संतु कुतोऽविरोध इ
त्याशंक्य नेत्याह। ते ते ये गुणाः रजःसत्त्वतमोरूपाः तेषामुन्मीलनादाधिक्यात् ब्रह्मेत्यादिसंज्ञाः रजस आधिक्यात् ब्रह्मेति। सत्त्वाधिक्याद्विष्णु

आगमानां च तत्त्वं विचारयतामविरोध एव। तथाहि। ज्योतिः शान्तमनंतमव्ययमजं तत्तद्गुणोन्मीलनाद्ब्रह्मेत्यच्युत इत्युमापतिरिति
प्रस्तूयतेऽनेकधा। तैस्तैरेव सदागमैः श्रुतिमुखैर्नानापथप्रस्थितैर्गम्योऽसौ जगदीश्वरो जलनिधिर्वारां प्रवाहैरिव॥ राम॥॥

रिति। तमस आधिक्यादुमापतिरिति। एकस्यैव गुणोपाधिकाः संज्ञाः न तु वास्तवो भेद इति भावः। कीदृशं ज्योतिः शान्तं रागद्वेषाभिनिवेशसौम्यं पु
नः कीदृशम् अनंतं वस्तुतः कालतः देशतश्चेति त्रिविधपरिच्छेदशून्यं पुनः कीदृशम् अव्ययं विकारशून्यं अजं जन्मरहितं। यद्यप्येवं तथापि नाना श्रुति
भिः ब्रह्मविष्णुशिवप्रतिपादिकाभिर्नानात्वमेव न त्वैकात्म्यमित्याशंक्याह। नानेति। नानापथप्रस्थितैर्नानामार्गप्रवृत्तैः श्रुतिमुखैरुपनि
षत्प्रधानैः असौ अपरोक्षो जगदीश्वरः यत्साक्षादपरोक्षादिति श्रुतेः। गम्यः ज्ञानप्राप्यो बोध्यः। अभेदे दृष्टान्तमाह। वारां जलानां प्रवाहैर्जलनिधि
रिव। यथा नद्यः स्यंदमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते एवमेवास्य परिद्रष्टुरिमाः षोडश क
लाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे पुरुष इत्येवं प्रोच्यत इति। श्रुतिः पाठांतरे। यथा नद्यः स्यंदमानाः समुद्रेऽस्तं यन्ति नामरूपे वि

हायेत्यादि श्रुतेः। तथा च गीतायां। येऽप्यन्यदेवता भक्ता
यजन्ते श्रद्धयान्विताः। तेऽपि मामेव कौन्तेय यजन्त्यविधि
पूर्वकमिति। ॥॥

ततोदेवीति। तेषामस्माकंच करितुरगपदातीनांयोधानांच वीराणांतुमुलोदारुणः संप्रहारः संग्राम: प्रावर्त्तत अजायत। कीदृशानांतेषामस्माकं
चाभिरंतरंनिबिडं शरनिकराणांबाणसमुदायानांयोधारासंपातरवसंपातोवृष्टिस्तेनउपदर्शितंदुर्द्दिनंमेघाछन्नमहोयेभ्यस्तेषां। बहलेति।
तत्रसंग्रामेस्त्रवंत्योनद्यः ससुरस्त्रवन्। कीदृश्यः स्त्रवंत्यः। बहलंरुधिरमेवतोयंजलंयासुताः। पुनःकी० निबिडंघनंपिशितंरक्तमेवपंकः
कर्द्दमोयासुताः। कंकाःपक्षिणस्तएवरंकादीनाःप्राणिनस्तैरेवकीर्णाःव्याप्ताः। शरैर्द्दलिताःजर्जरीकृताः अतएवविदीर्णायेउत्तुंगाउ
च्चामातंगाःकरिणः तएवशैलाःपर्व्वतास्तेभ्यःस्रवलितरयाःशून्यवेगाश्चतेभ्यः विकीर्णछत्राण्येवहंसास्तएवअवतंसाःभूषणानि

विष्णुभक्तिः॥ ततः २ श्लद्ध। ततोदेविपरस्परंकरितुरगरथपदातीनांभिरंतरशरनिकरधारासंपतोपदर्शितदुर्द्दिनानांतेषामस्मा
कंचयोधानांतुमुलः संप्रहारःप्रावर्त्तत। तथाहि। बहलरुधिरतोयास्तत्रसस्रुःस्रवंत्योनिबिडपिशितपंकाःकंकरंकावकी
र्णाः। शरदलितविदीर्णोत्तुंगमातंगशैलस्खलितरयविकीर्णछत्रहंसावतंसाः। तस्मिंश्चातिमहतिदारुणेसंग्रामेपरापर
पक्षविरोधितपापाखंडागमैरग्रेसरीकृतंलोकायतंतत्रमन्योन्यसैन्यविमर्द्दनेनष्टम्॥

यासुताः। अथपाषंडान्यकारमाविष्करोति। तस्मिंश्चेति। तस्मिन्पूर्वनिरूपितेऽतिमहतिदारुणेसंग्रामेलोकायततंत्रंशरीरात्मवादिशास्त्र
म्। अन्योन्यंपरस्परंसैन्यविमर्द्दनाभिसंघट्टनाभितैरेवनष्टम्॥ सर्व्वथायुक्तिशून्यमितिभावः। तस्यप्रथमतोविनाशेहेतुमाह। कीदृशं
तंत्रं। पाखंडागमैःसौगतसौत्रांतिकमाध्यमकादिभिरग्रेसरीकृतंपुरस्कृतमन्योन्यविमर्द्दनेकारणं। परापरेति। परउत्कृष्टःसदागमरूप
स्तर्कः अपरःअपकृष्टःपाखंडागमरूपस्तर्कः तयोर्व्विरोधितया। लोकायताहिभूतपरिणामरूपशरीरमेवात्मानमुरीकुर्व्वंति। तच्चास्तिका
नांसर्व्वेषांनास्तिकानांचानभिमतमितिविरोधइतिभावः॥ ७८

प्र॰टी॰ अन्यदिति। अन्यदप्यस्ति श्रोतव्यमिति शेषः। पाखंडेति। सदागमाः समीचीना आगमाः वेदमूलास्त एवातिविस्तृतत्वादर्णवाः तत्प्रवाहे न प्रमाणपरंपरारूपेण
४९ पाखंडत्रैविद्यवृद्धाचारानुष्ठातारः पाखंडास्तेषामागमाः पर्यस्ताः दूरप्रक्षिप्ताः। यतो निर्मूला इत्यर्थः। तदेवाह सौगता इति। सौगताः सुगतप्रणीता आ
गमाः म्लेच्छप्रायान् म्लेच्छधर्माक्रांतान् जनपदान् देशान् प्रविष्टाः ते देशाः सिंधुगांधारादयः। पाखंडेति। पाखंडः अहिंसामात्रनिरतअग्नीषोमीया
दिहिंसामपि तिरस्कुर्वन् श्वेतपटस्य सिद्धांतः दिगंबरः सत्वासत्ववादी क्षपणकसिद्धांतः। कापालिको भैरवसिद्धांतः यथेष्टवादी। पामरा अतिनी
अन्यत। पाखंडागमा निर्मूलतया सदागमार्णवप्रवाहेण पर्यस्ताः। सौगता सिंधुगांधारमगधांध्रहूणवंगकलिंगादीन् म्लेच्छप्रायान् जनपदान् प्र
५१ विष्टाः। पाखंडदिगंबरकापालिकादयस्तु पामरबहुलेषु पांचालमालवाभीरावर्त्तसागरानूपेषु निगूढं संचरंति। न्यायाद्यनुगतया मीमां
सया चगाढप्रहारजर्जरीकृताः नास्तितर्कास्तेषामेवागमं नाममनुपदं प्रयाताः। विष्णुभक्तिः। ततस्ततः। श्रद्धा। ततो वस्तुविचारेणाका
मो हतः। क्षमया क्रोधपारुष्यहिंसादयो निपातिताः। संतोषेण लोभतृष्णा दैन्यानृतवादपैशून्यस्तेयपरिग्रहा निगृहीताः। अनसूयया
मात्सर्यं जितं। परोत्कर्षसंभावनया मदो निषूदितः। परगुणाधिक्येन मानः खंडितः। विष्णुभक्तिः। सहर्षं साधु साधु संपन्नं। अथ महा
मोहस्य को वृत्तांतः। श्रद्धा। देवि महामोहोपि योगोपसर्गैः सह न ज्ञायते क्वापि निलीनस्तिष्ठतीति। विष्णुभक्तिः। अस्ति तर्हि महामोहा
नर्थशेषः प्रहरणीश्वासो॥ ॥ ॥
वाः तद्बहुलेषु तत्प्रचुरेषु। नास्तिकानां वाह्यानां तर्काः शास्त्राणि अनुपश्चात्तेषामेवागमानां पाखंडागमानां पदं स्थानं प्रयाताः प्राप्ता इत्यर्थः।
ततो वस्तुविचारेणेत्यादि अथ महामोहस्येत्यंतं निगदव्याख्यातं। योगभ्रंशं मोहस्य दृष्ट्वा योगिभिः समाहितमनस्कतया स्थातव्यमिति ज्ञा
पयंती विष्णुभक्तिः मोहवृत्तांतं पृच्छति। अथेति। वृत्तांतः समाचारः। योगोपसर्गैः योगो विघ्नैः सह निलीनो गुप्तस्तिष्ठतीति इति हेतोः न ज्ञा
यते॥ ॥ ॥६४॥ ४९

उक्ते नयमुपदिशति। यत इति। विद्वान्पंडितः अत्यादरपरः अतिशयितादरयुक्तः स्थिरां निश्चलां श्रियं संपत्तिं ईहमानः इच्छन् अग्नेः शेषं ऋणाच्छेषं शत्रोः
शेषं न शेषयेत् न स्थापयेत्। अनादरपर इति पाठे अग्न्यादिशेषस्थापने अनादरवता न भाव्यम्। किंतु तत्परिहारे यत्नवता भाव्यमिति भावः। वैराग्यव
तो मनसः प्रवेशमाह। अथ मनस इति। पुत्रपौत्रादेर्व्यसनं मरणं तेन जनितशोकस्य आवेशः प्रवेशो यस्मिन्। तेन मनसा जीवोत्सर्गाय प्राणत्यागा
य नव्यवसितं निश्चितं निर्णयः कृतः। स्मितं हास्यं। यद्येवं स्यात् विषयविनिर्मुक्तः स्यात् म्रियेतेत्यर्थः। कृतकृत्याः संपन्नप्रयोजनाः। पुरुषो जीवः परां
निवृत्तिं परमानंदं। दुरात्मनो दुष्टस्वभावस्याद्देव्यामुपनिषद्रूपायां शरीरेण सह न भविष्यति निरक्तं न भविष्यति प्रवेशमुपसंहरति। तद्भवतीति। निष्क्रांते

यतः। अत्यादरपरो विद्वानीहमानः स्थिरां श्रियं। अग्नेः शेषं ऋणाच्छेषं शत्रोः शेषं न शेषयेत्। अथ मनसः कोवृत्तांतः श्रद्धादेवितेन
पिपुत्रपौत्रादिव्यसनजनितशोकावेशेन जीवोत्सर्गाय व्यवसितं। विष्णुभक्तिः स्मितं कृत्वा। यद्येवं स्यात्सर्वे एव वयं कृतकृत्या भवा
मः पुरुषश्च परां निर्वृतिमापद्यते किंतु कुतस्तस्य दुरात्मनो जीवत्यागः। श्रद्धा। एवं देव्याः प्रबोधोदयाय गृहीतसंकल्पायामचिरं शरीरेण
सह नैव भविष्यति। तद्भवत्वस्य वैराग्योत्पत्तये वैयासिकीं सरस्वतीं प्रेषयामः इति। निष्क्रांते। प्रवेशकः। ततः प्रविशति मनः संकल्पश्च।
मनः सास्रं। हा पुत्रकाः क्व गताः स्थ। दत्तामे प्रियदर्शनं। भो भो कुमारकाः रागद्वेषमदमात्सर्यादयः अपि मंद परिष्वजध्वं मांगानिहा। न कश्चि
न्मां वृद्धमनाथं संभावयति। क्व गता असूयादयः कन्यकाः आशा तृष्णा हिंसादयो वा स्नुषाः॥ कृतांता अपि मंदभाग्यस्य मे समकालमे
व दैवहतकेनोपहृताः सर्वेन्लव्यां। विसर्पति विषाग्निवत् दहति शर्म मर्माणि मे तनोति भृशं वेदनाः कर्षति सर्वकाशं वपुः विलुंपति वि
वेकितां हृदि च मोहमुन्मीलयत्यहो ग्रसति जीवितं प्रसभमेव शोकज्वरः॥ ॥
विष्णुभक्तिः श्रद्धा। संकल्पो मनो व्यापारः। दत्तप्रयच्छत प्रियमिष्टं दर्शनं। प्रतिवचनमिति पाठे प्रतिवचनं प्रत्युत्तरं। विसर्पतीति। एष शोकज्वरः वि
षाग्निवत् विषरूपोग्निस्तद्वद्विसर्पति सर्वशरीरं व्याप्नोति। मे मम शर्म सुखं मर्माणि च विषाग्निवद्दहति ज्वालयति। भृशमतिशयेन वेदना
स्तनोति विस्तारयति। सर्वकाशं सर्वच्छेदं यथा स्यात्तथा वपुः कर्षति छिनत्ति। विवेकितां विलुंपति विनाशयति हृदि मनसि मोहं बुद्धिभ्रंशं उन्मील
यति प्रकटयति। अहो इति चित्रं प्रसभं हठेन जीवितं
ग्रसति गिलति। शोकज्वर इति सर्वत्रानुषंजनीयम्॥

प्र॰टी॰
५०

प्रवृत्तिः प्रवर्त्तिका वेदविद्या। एवमवस्थं मुमूर्षुं यतो हेतोः श्रुतं आकर्णितं कुटुंबकानां कामादीनां व्यसनं निधनं तेन संजातो यः शोकानलः तस्माद्
ग्धं हृदयं यस्याः सा। हृदयास्फोटं स्वांगे धक्कवरतिपाम्। हृदयं प्रस्फुटयवि...ति हृदयास्फोटं विनष्टा मते त्यर्थः। वैराग्ये उत्पन्ने प्रवृत्तिर्नश्यतीति
तात्पर्यम्॥ अन्योनाद्य धर्म्मः स्वप्ने पीति। स्फुटं पूर्व्वार्धम्। देहे विविधैर्दैवस्य दुर्ल्ललितैर्दुष्टविलसितैर्यद्यपि दूरीकृतासि दूरं नीतासि तथापि
मनो जीवतीत्यलम् असंभावनीयमेतत्। तर्हि जीवने को हेतुस्तत्राह यतः असवः प्राणाः दुरंताः सहसा प्रयत्नादिना न नश्यंति। जीवत्येवाहि
इति मूर्छितः पतति। संकल्पः राजन् समाश्वसिहि २ मनः समाश्वस्य कथं देवी प्रवृत्तिरपि न मामेवमवस्थं समाश्वासयति। संकल्पः
सा स्त्री देव कुतोद्यापि प्रवृत्तिः। यतः श्रुतकुटुंबव्यसनसंजातशोकानलदग्धहृदया हृदयास्फोटं विनष्टा। मनः। हा प्रिये क्वासि देहि मे
प्रियं प्रतिवचनं। ननु देवि। स्वप्नेपि देविरमसे न मया विना त्वं स्वापेत्वया विरहितो मृतवद्भवामि। दूरीकृतासि विधिदुर्ल्ललितैस्तथा
पि जीवत्यलं हि मनस्त्यसवो दुरंताः। पुनर्मूर्छति। संकल्पः राजन् समाश्वसिहि २ मनः। समाश्वस्य अलमस्माकमतः परं जीवितेन। सं
कल्प चितामारचय। यावदनलप्रवेशेन शोकानलं निर्व्वापयामि। ततः प्रविशति सरस्वती वैयासिकी। प्रेषितास्मि भगवता विष्णुभ
क्त्या। यथा सखि सरस्वति गच्छ प्रत्यव्यसनखिन्नस्य मनसः प्रबोधनाय। यथा च तस्य वैराग्योत्पत्तिर्भवति तथा यतस्वेति। तद्भवतु
त्संनिधिमेवोपसर्प्पामि। उपसृत्य वत्स किमेव प्रतिबिबोसि। ननु विदितपूर्व्वैव भवता भावानामनित्यता॥ ॥ ॥
मन इति पाठे। तथापि मनो जीवति कुतः असवो दुरंताः स्वप्रयत्नेन नाशयितुमशक्याः यतः। इत्येव हि जानीहि। सरस्वत्याः प्रवेशं स्तौति। ततः प्र
विशतीति। सखि सरस्वति इति संबोधनेन यथा विष्णुभक्तिस्तथा वैयासिकी सरस्वतीति सूचितं। यतस्व प्रयत्नवती भव। विदितपूर्व्वैवापू
र्व्वं विदिता ज्ञाता विदितपूर्व्वा। भावानामनित्यत्वं पदार्थानामुत्पत्तिमतामिति शेषः। तथा च पदार्थाः ध्वंसप्रतियोगिनः उत्पन्नत्वादित्यनुस्थितं। ननु चातुर्म्मा
स्यफलस्याक्षय्यत्वश्रुतेरसिद्धो हेतुश्चेन्न। अक्षय्यत्वश्रुतेर्गुणार्थवादत्वात्परत्वात्। तद्यथेह कर्म्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति श्रुत्यंतरविरोधाच्च श्रवणविधिवैय
र्थ्याच्च हेतोरसिद्धता असिद्धेति भावः॥ ४०॥

विदितनपूर्वैर्वानित्यतेत्यत्रबीजमाह।अधीतानीति।इतिहासेभवानिऐतिहासिकानि।भूत्वेति।अंभुजभुवोहिरण्यगर्भाःसेंद्राइंद्रेणसहितादेवाअसुरा
श्चमन्वाद्याःभूपालाः।मुनयोऽत्रऋषयः।महीधरीत्रीजलधयःसागराःपराःअधिकाःकोटयःकोटिभ्योअधिकाअसंख्याताः।भूत्वाउत्पद्यनष्टाःना
शंप्राप्ताःअल्पायुषाः।नाशोकापरिदेवनेत्याशंक्याह।कल्पशतायुषामितिकल्पानांशतानिआयुर्येषांतेतथा।कल्पोयुगचतुष्टयंशतशब्दोऽ
संख्यातवचनः।एवंचसतिबंधोःपुत्रादेःवपुषिदेहेफेनसमेबुद्बुदसमसमयजीवितेपंचात्मिकेपांचभौतिकेपंचतांगतेमरणंप्राप्तेसतियत्उ
दयतेउत्पद्यतेइत्ययंलोकस्यशोकावहःशोकजनकःमोहनिवारणीयःकोमोहःअहोरत्याश्चर्येनकोपीत्यर्थः।उक्तमर्थंस्थिरीकर्तुंपुनः
पुनरनुसंधेहीत्युपदिशति।तदिति।भावय।चिंतय।भावनायाःफलमाह।नित्येतिनित्यंब्रह्मैव।अन्यत्सर्वमनित्यंएतद्वस्तुद्वयदर्शनः।यद्वा

अधीतानित्वयेतिहासिकान्युपाख्यानानितथापि।भूत्वाकल्पशतायुषांभुजभुवःसेंद्राश्चदेवासुरामन्वाद्यामुनयोमहीजलध
योनष्टाःपराःकोटयः।मोहःकोयमहोमहानुदयतेलोकस्यशोकावहोबंधोःफेनसमेगतेवपुषियत्संचात्मकेपंचतां।यद्भावय
भावनामनित्यतां।नित्यमनित्यंवस्तुदर्शनोनपश्यतिशोकावेगं।यतः।एकमेवयदाब्रह्मसत्यमन्यद्विकल्पितं।कोमोहस्त
त्रकःशोकएकत्वमनुपश्यतः॥

नित्यंनिरंतरंअनित्यस्यनश्वरस्यप्रपंचस्ययद्वस्तुअधिष्ठानंब्रह्मतत्त्वयःपश्यतिसशोकावेगंसंसारंनपश्यतिइत्यर्थः।यतोन्यदन्यदि
वपश्यन्मुह्यति।एकत्वमनुपश्यतांकोमोहःशोकइत्यादिश्रुतिभिरप्युक्तमिति।उक्तमर्थंउपनिषदारूढंकरोति।एकमेवेतियदायदिएकं
निरस्तसद्वितीयंब्रह्मैवसत्यंइतरत्ब्रह्मान्यत्विकल्पितंअनिर्वचनीयंसद्भिन्नत्वमेवानिर्वचनीयतायालक्षणंतथाब्रह्मान्यस्यमि
थ्याभूतस्यप्रतीतिकस्यनश्वरत्वात्एकत्वमेवपारमार्थिकंअनुपश्यतःसम्यक्तयाजानतःतवकोमोहःनकोपीत्यर्थः।मोहाभावात्कशो
कःनकोपीत्यर्थः।एवंचसतिअंतेब्रह्मभावनयाब्रह्मैवभवतिसंसार्यपिभावनयांतेसंसार्येवभवति।उक्तंगीतायाम्।यंयंवापिस्मरन्भा
वंत्यजत्यंतेकलेवरम्।तंतमेवैतिकौंतेयसदातद्भावभावितइतिहेतोःशोकावेशस्त्वीयंमनोनार्पणीयम्।अर्पितेचेत्सदासंसार्येवशोका
दभिर्म्मुक्तएवस्यादितिभावः॥

भगवतीति।सरस्वतींसंबोधयति।हेभगवतिसरस्वतिशोकावेगदूषितेममनसिविवेकोऽवकाशंनलभतएवेतियोजना।स्नेहस्यानर्थ
हेतुत्वंप्रकटयति।तथाहि।उप्यंतइति।नरैर्मनुष्यैः।प्रियइत्याख्यायेषांपुत्राद्यभिलाषाणांतेप्रियाख्याः।नाम्नैवप्रियत्वंनस्वरूपतः।तएव
वस्तुतःक्लेशाः।आउत्पत्तेरामरणमतिक्लेशजनकत्वात्संसारहेतुत्वाच्चतेउप्यंतेरोप्यंते।कीदृशाःक्लेशाः।विषवल्लीबीजंविषयकंहस्त
द्विषमाःदुःसहाः।तेभ्यःअभिलाषेभ्यः।नचिरात्त्रुटितिस्नेहमयाःस्नेहस्वरूपाः।वज्राग्निगर्भाःवज्राग्निवत्गर्भोयेषांतेचतेअंकु
राःदाहछेदपातादिसमर्थाःभवंति।येभ्यःस्नेहांकुरेभ्यःअपीत्वपिदृश्यमानाःशतशोअनंताःशोकरूपाःद्रुमाःवृक्षाःरोहंतिउद्भवंति

२। मनः।भगवतिशोकावेगदूषितेमनसिविवेकएवमेनावकाशंलभते।सरस्वती।वत्सस्नेहदोषएषः।प्रसिद्धएवायमर्थः।।स्ने
हःसर्वानर्थःप्रभवति।तथाहि।उप्यंतेविषवल्लिबीजविषमाःक्लेशाःप्रियाख्यानरैस्तेभ्यःस्नेहमयाभवंतिनचिराद्वज्राग्नि
गर्भांकुराः।येभ्योमीशतशःकुकूलकृतभुग्दाहंदहंतःशनैर्देहंदीप्तशीखासहस्रशिखरारोहंतिशोकद्रुमाः।मनः।देवि
यद्यैवंतथापिनशक्नोमिशोकानलदग्धःप्राणान्धारयितुंसाधुसंपन्नंयदंतकालेत्वंतावद्दृष्टासि।सरस्वती।इदंच
परमकृत्यंयदात्महत्याव्यवसायरक्षि।अपिचामीषांपापकारिणामर्थेकोयमत्यावेगोभवतःपश्यतावत्।। ।। ।।

त्यर्थः।कीदृशाःशोकद्रुमाः।कुकूलकृतभुग्दाहं।कुकूलंतुषमेवकृतंहोमद्रव्यंभुनक्तीतिकुकूलकृतभुक्तुषाग्निस्तद्वग्निदाहवद्घोरा
हस्तंतद्वत्कर्मणिचोपमानइतिणमुल्शनैःमंदंदेहंशरीरंदहंतः।कुकूलंशंकुभिःकीर्णेश्वभ्रेन्यत्रतुषानलइतिकुमुदाकरः।तुषाग्नि
दृष्टांतोदुःखस्यचिरपाकित्वसूचनार्थइतिभावः।पुनःकीदृशाःशोकद्रुमाः।दीप्ताःयाःशिखाःदुःखांतरस्मृतयः।तासांसहस्रंशिखराअग्र
भागाःउद्बोधकरूपायेषांते।साधुसंपन्नंसम्यक्जातमित्यर्थः।इदंचेति।परंस्थूलमकृत्यंअकार्यं।किंतदित्याह।यदिति।व्यवसायउद्यो
गःशरीरत्यागेनापिदधीचिवत्साधुषुउपकर्त्तव्यमित्याशंकनेत्याह।अपिचेत्यादि।अपकारिणांनिरंतरदुःखदानांभवतोमनसःकोप

[illegible]

क्वचिदिति। एते परिग्रहाः। पुत्रकलत्रादयः तव सुखाय न भवंति। मम सुखाय मा भवंतु। अन्येषां पुंसां पुत्रकलत्रादेव सुखदायका भविष्यंतीत्याशंक्या
ह। अन्येषामपि पुंसां न एभ्यः कोप्युपकारस्त्याह। अमीभिः क्वचित्कुत्रापि प्युपकृतिरुपकारः कर्त्ता करिष्यते कृता वा अथ क्रियते वा न क्वापि काल
त्रयेपि उपकुर्वंतीति सुखहेतवो न भवंतीति भावः। ननु पुत्रादीनां लालनादि ब्रह्मानंदो नुभूयत इति। वदंति पुत्रिणः तत्कथं पुत्रादीनां सुखजनक
त्वमित्याशंक्याह। दधतीति। विरहे वियोगे मर्मच्छेदं दधति पुष्णांति यद्यप्येवं तदपि तथा अहो आश्चर्य्यं जंतवः विपुलाः बहवः आयासाः श्रमाः

क्वचिदुपकृतिः कर्त्ताऽमीभिः कृता क्रियते थवा तव न भवं त्येते पुंसां सुखाय परिग्रहाः। दधति विरहे मर्मच्छेदं तदर्थमपार्थकं तद
विपुलायासाः सीदंत्यहो बत जंतवः। अपिच। तीर्णाः कति न सरितो लंघिताः के न शैला नाक्रांता वा कति वनभुवः क्रूरसंचारघो
राः। पापैरेतैः किमिव दुरितं कारितो नासि कष्टं यद्दृष्टास्ते धनमदमपीम्लानवक्त्रा दुरीशाः॥ ॥

येषां ते तदर्थं तत्प्रयोजनाय अपार्थकं व्यर्थं बत इति खेदे सीदंति दुःखिता भवंति। अपिच। एते शोकयोग्या एव न भवंति अपकारित्वादित्याह।
अपिच। तीर्णा इति एतैः पापैः किमिव दुरितं कारितो नासि किंतु सर्वं दुरितं कष्टं कारित एव। त्वया उपनाचितं कृत्वा पूर्णाः वर्षाकालीनाः स
रितो नद्यः कति कियत्संख्याका न तीर्णा अपितु बह्व्यस्तीर्णा इत्यर्थः। के शैला न लंघिताः नाक्रांताः अपितु सर्वे। क्रूराणां व्याघ्राणां संचा
रेण घोरा वनभुवो रण्यस्थल्यः कति कियत्यो नाक्रांताः अपितु सर्वा एव कारिते प्येतावत्यनर्थे यतो यस्मात्कारणाद्धनमद लक्ष्मीगर्वेः स
एव मपीन धुक्ताम्लअत एव म्लानानि शुष्काणि वक्त्राणि येषां ते। दुरीशाः दुष्टप्रभवः कष्टं यथा स्यात्तथा दृष्टाः। एवं च कामादिभ्यो विरज्जि
तव्यमितिभावः॥६॥

एवं वैराग्ये हेतोः सत्यपि वैराग्यं नोत्पद्यत इत्याह। ललितानामिति। यस्मात्स्वशरीराज्जातानां बालभावे चुंबनालिंगनैर्लालितानां अत एव चिरं हृदि सं-
चरतां विच्छेदो योगः मर्म्मच्छिदादपि अरुंतुदः व्यथातिशयकरी। तत्र दृष्टांतः प्राणानां विच्छेदो वियोगः स यथा मर्म्मच्छेदाद् अतिपीडाकरस्तद्वयेदम-
पीत्यर्थः। वत्स ममतेति। ममता मदीयत्वाभिमानः तस्य वासना सर्व्वकालमनुवृत्तिः सैव निबंधनं कारणं यस्य सः। ममतासंबंधादेव दुःखमि-
त्यस्मिन्नर्थे संभवति माह। उक्तं चामार्ज्जारेति। मार्ज्जारभक्षिते गृहकुक्कुटे स्वगृहपोषितकुक्कुटे यादृशं दुःखं तादृशं कलविंके चटके म-
मताशून्ये मूषके च मार्ज्जारभक्षिते न दुःखं ममताशून्यत्वात्। तस्मान्ममतैव दुःखहेतुरिति भावः। एवं सति ममतोच्छेदे यत्नः कार्य्य इत्याह। त-
51 मनः। देवि एवमेतत्। तथापि। लालितानां स्वजातानां हृदि संचरतां चिरं। प्राणानामिव विच्छेदो मर्मच्छेदाद् अरुंतुदः॥ सरस्वती। वत्स।
ममतावासनानिबंधनोयं व्यामोहः। उक्तं च॥ मार्ज्जारभक्षिते दुःखं यादृशं गृहकुक्कुटे। न तादृङ् ममताशून्ये कलविंकेथ मूषके॥
तत्सर्वानर्थबीजस्य ममत्वस्योच्छेदे यत्नः कर्त्तव्यः॥ पश्य। प्रादुर्भवंति वपुषः कति वा न कीटा यान्यत्नतः खलु तनोरपसार-
यंति। मोहः क एष जगतो यदपत्यसंज्ञां तेषां विधाय परिशोषयति स्वदेहम्। मनः। देवि भवत्वेवं तथापि दुरुच्छेद्यस्तु ममत्व-
सर्वानर्थेति। सर्व्वे अनर्था यस्मात् स सर्व्वानर्थः स्नेहः तस्य बीजं कारणं तादृशस्य ममत्वस्योच्छेदाय यत्नः कार्य्य इत्यत्र तात्पर्यम्। विचाराधी-
नो ममतोच्छेद इति दर्शयति। पश्य। प्रादुर्भवंतीति। यान्कीटान् तनोः शरीरात् खलु निश्चयेन यत्नतः पूर्वमपसारयंति निष्काशयंति ते की-
टाः यूकादयः वपुषः शरीरात् कति किं यंतो वा न प्रादुर्भवंति नोत्पद्यंते। अपि तु उत्पद्यंत एवेति एष जगतो विश्वस्य मोहः यत्तेषां स्वशरीरोत्प-
न्नानां अपत्यसंज्ञां विधाय कृत्वा स्वदेहं परिसमंतात् शोषयति। यूकादौ स्वदेहोत्पन्नेपि ममताभावान्न देहशोषः। पुत्रे ममताभिमानस्य सत्वाद्दे-
हशोष इत्येष को मोह इति भावः। ममत्वग्रंथिः ममताभिमानः॥

ममत्वग्रंथेर्दुरुच्छेद्यत्वंप्रकटयति।तथाहीति।अवधारयतुसावधानंभूत्वामनसिधारयतुविस्मरणंमाभवत्वित्यर्थः।निरंतरेति।जंतोर्जीवस्यमम
त्वरूपोयःपाशस्तस्ययतउपायाद्धिमोक्षःत्यागःतमुपायंहेभगवतित्वंकिंचिज्जानासितर्हिवदेतिशेषः।कीदृशस्यममत्वपाशस्यनिरंतरंअनवर
तंयोभ्यासस्तेनदृढीकृतस्यपुनःकीदृशस्यममत्वपाशस्य।स्नेहेनसहवर्त्ततइतिसस्नेहाःअंतःकरणवृत्तयस्ताएवसूत्राणितैर्ग्रंथितस्यगुंफि
तस्य।अनित्यताभावनमेवअनित्यतावधारणमेव।प्रथमोभ्युपायोमुख्योहेतुः।नकतीति।यत्यस्माद्धेतोःतवास्मिन्वितते विस्तीर्णेसंसारे
तथाहि।तावदवधारयतुभवती।निरंतराभ्यासदृढीकृतस्यसस्नेहसूत्रग्रथितस्यजंतोः।जानासिकिंचिद्भगवत्युपायंममत्वपाश
स्ययतोविमोक्षः।सरस्वती।वत्सभावानामनित्यताभावनमेवतावन्ममतोच्छेदस्यप्रथमोभ्युपायः।तथाहि।नकतिपितरोदाराः
पुत्राःपितृव्यपितामहाःमहतिवितते संसारेस्मिन्नगतास्तवकोटयः।तदिहसुहृदांविद्युत्पातोज्ज्वलान्क्षणसंगमान्सपदिहृ
दयेभूयोभूयोनिवेश्यसुखीभव।मनः।भगवति।तवप्रसादादपास्तएवव्यामोहः॥६१॥

कतिकोटयःकतिकोटिसंख्याःपित्रादयोनगताःकिंतुगताएवदाराःस्त्रियःपुत्राःसुताःपितृव्याःपितृभ्रातरःपितामहाश्चतेअपिकिंनगताः
किंतुगताएवेतिसंबंधः।तत्तस्माद्धेतोःइहजगतिसुहृदांबंधूनांविद्युत्पातवत्उज्ज्वलान्दारुपातय।प्रकाशमानान्क्षणान्क्षणमात्रमे
वसंगमोयेषांतान्हृदयेअंतःकरणेभूयोभूयःपुनःपुनःनिवेश्यअवधार्य्यनिश्चित्यसपदितत्क्षणमेवसुखीभवेत्यर्थः।मंदबुद्धयः
पितृप्रभृतिषुव्यर्थंउद्दीरतांदुःसंतापमनुभवंतिविदुषांपुनरेवसंसारेअत्यंतकटुपरिणतोज्ञातेवैराग्यमेवाविर्भवतीतिभावः।कथमद्या
पिसंसारचक्रक्रकचसंभ्रमाद्भ्रमभीत्याश्चर्य्यमिवभवतीत्याशंक्याहभगवतीति॥ ॥

प्र॰टी॰ ५२ मोहशोकमद्यापि न मुंचतीत्याह। किंत्विति। हे भगवति तव मुखमेव शशधरबिंबः तस्य दीधितयः किरणास्ताभ्यः गलिताभिः स्रुतास्तैर्विम
लनिर्मलैरुपदेशा एव पीयूषाणि अमृतानि तैः मे मम हृदयं मनः क्षालितमपि आत्मावबोधयोग्यं संपादितं शोकोर्मिभिः लहरीभिः मलि
नं क्रियते आव्रियते। अहो अस्य भावनासंस्कारा बलवत्तरा इत्यर्थः। तदस्येति। आर्द्रस्य नूतनस्य शोकएव प्रहारस्तस्य। मुनिभिरुपदिष्टं मार्ग
मुपदिशामीत्याह। अकांडेति। अकांडे पातः आपप्रहारो यत्र तथा जाता नामुक्तानामार्द्राणामभिनवानां मर्मभेदिनामतिव्यथाकराणां।

किंतु तव मुखशशधरदीधितिगलितैर्विमलोपदेशपीयूषैः। क्षालितमपि हृदयं मलिनं शोकोर्मिभिः क्रियते॥ तदस्यार्द्रस्य शो
कप्रहारस्य भेषजमाज्ञापयतु भगवती। सरस्वती। वत्स नूनमुपदिष्टमेवात्र मुनिभिः अकांडपातजातानामार्द्राणां मर्मभेदि
नां। गाढशोकप्रहाराणामचिंतैव महौषधिः। मनः। भगवति एवमतिदुर्वारं नु चेतो यतः। अप्येतद्वारितं चिंतासंतानैरभिभू
यते। मुहुर्वाततहतैर्बिंबमभ्रच्छेदैरिवैंदवं। सरस्वती। वत्स श्रूयतां चेतसोयं विकारः तत्क्वचिच्छांते विषये चेतो। निवेश
यमनः। तत्प्रसीदतु भगवती। कोसौ शांतो विषयः। सरस्वती। वत्स गुह्यमेतत्तथाप्यार्त्तानामुपदेशेन दोषः॥ ॥

एतादृशानां गाढादृढाः पुनःपुनः स्मारकाः ये शोका एव प्रहाराः तेषामचिंतैव। असंकल्प एव महौषधिः नान्य इत्यर्थः। अप्येतदिति। एतच्चे
तो मनः वारितं निवारितमपि चिंतासंतानैः चिंतापरंपराभिः अभिभूयते पराभूयते। तत्र दृष्टांतः। अभ्रच्छेदैः मेघखंडैः इंदोरिदमैंदवं
चांद्रमसं बिंबं चमिव। कीदृशैरभ्रच्छेदैः मुहुर्वारं वातेन आसमंताद्धतैर्नीतैः श्चालितैरित्यर्थः। शांते विषये शोकमोहादिरहिते। नि
वेशय। गुह्यं गुप्तं आर्त्तानां मोहशोकपीडितानाम्॥

राम॰ ५२

उपदिशति। नियमिति। हे मनस्त्वं। इत्यध्याहारः। अस्त सर्वथा कालत्रयेपि शोकः संसारकारणीभूतं दुःखं यस्मिन्नादृशं ब्रह्मवाएवार्थे ब्रह्मैव प्रविश्य अ
द्वितीयत्वेन ज्ञात्वा द्वितीयाद्वै भयं भवतीति श्रुतेः। भयं द्वितीयाभिनिवेशतः स्यादिति महाभागवतोक्तेश्च। आत्मनिहिता आत्मनीनातां निवृत्तिपरससु
खं भज प्राप्नुहि। तत्र दृष्टांतः। ग्रीष्मे सुशीतं ह्रदमिव। यथा चंडशुकरसंतप्तः शीतं तरिनी ह्रदं प्रविश्य सुखमनुभवति। तथा संसारसंतप्तो ब्रह्मप्रविश्य
तत्सुखमनुभवतीत्यर्थः। निर्गुणे निराकारे निर्विषये कथं मनसः प्रवृत्तिरित्याशंक्य आदौ साकारे प्रवृत्तिः सुकरेतीत्याह। किं कुर्वन् नूतनजलदनीलं
घनश्यामं। उदारोऽमूल्यो यो हारः केयूरं बाहुभूषणं कुंडलं कर्णभूषणं किरीटं मुकुटं एतानि धरतीति हरिं हरति संसारं अज्ञानं तत्कार्यं असो
नित्यं स्मरन् जलदनीलमुदारहारकेयूरकुंडलकिरीटधरं हरिं वा। ग्रीष्मे सुशीतमिव वा ह्रदमस्तशोकं ब्रह्मप्रविश्य भजति निर्वृत्तिमात्म
नीनाम्॥ मनः किंचिंत्यसोच्छ्रू संसर्वथात्रातोस्मि भगवत्या इति पादयोः पतति। सरस्वती वत्स उपदेशसहिष्णु ते हृदयं जातं मये
तदप्यपरमुच्यते। वंशप्राप्ते मृत्योः पितरि तनये वा सुहृदि वा शुचालं तप्यंते भृशमुदरताडं जडधियः। असारे संसारे विरस
परिणामे तु विदुषां वियोगो वैराग्यं दृढयति वितत्वन् शमसुखं। ततः प्रविशति वैराग्यम्॥ ॥
हरिस्त्वं नित्यं स्मरन्। साकारस्मरणे निरंतरं निराकारे मनसः सुखप्रवृत्तिरिति भावः। यथा नूतनो धनुर्धरः स्थूलमपि लक्ष्यं लक्षीकर्तुमशक्नु
वानोऽभ्यासपरिपाकवशात्केशांतरप्रोतवराटिकां लक्षीकरोति तद्वदित्यर्थः। सर्वथा सर्वप्रकारेण वैराग्यप्रवेशमुपक्षिपति। वत्से
ति। उपदेशसहिष्णु उपदेशग्राहि। अपरं उक्तादन्यत् वंशमिति। पितरि जनके तनये पुत्रे सुहृदि संबंधिनि वा मृत्योर्मरणस्य वशाधी
नत्वं प्राप्ते सति मृते सति जडधियो मंदमतयः। उदरताडं उदरं संताड्य अलमत्यर्थं शुचा शोकेन अतिशयितशोकेन भृशमत्यर्थं तप्यंते। शु
चा संतप्यं इति वा पाठः। तु पुनः वियोगः पुत्रादिभिः सहेत्यर्थात् विदुषां ज्ञानिनां शमसुखं वितन्वन् विस्तारयन् असारेति सारे विरसः कटु
परिणामः फलं यस्य तादृशे संसारे वैराग्यं दृढयति॥

58

आस्याक्षिदिति। प्रजानांपतिः धाता। एतद्दुःशरीरं त्वक्स्नात्रेणात्वचामात्रेणाअंतरितमाच्छादितं आमिषंमांसंयस्यएवंभूतंयदि पुनर्न्नीस्त्राक्षीत्त्नो
त्पादयेत्तदावपुषि निपततोगृध्रान्मासोशिनःप्रक्षिलः ध्वांक्षान्काकान्वकान्भृगालान्श्वुनःकुक्कुरान्क्रौंचान्चक्राक्रान्प्रत्यग्रंनवं
क्षरत्अस्रंरक्तंतेनमिश्रंमिलितंयत्पिशितंमांसंतस्ययोग्रासः तस्यग्रहआदानंयत्रस्यांक्रियायांयथास्यात्तथागृध्रतःक्रोशतःकथंवा
रयेत्तनकथमपीत्यर्थः। त्वक्स्नात्राच्छादनमेवगृध्रादिनिवारणहेतुरित्यर्थः। कीदृशंवपुः। नवंनीलंयत्नीरजंनीलोत्पलंतस्यउपांतोग्रभागः
तद्वदतिसूक्ष्मंकोमलं। वैराग्यकारणीभूतंशारीरंदोषंप्रदर्श्यशरीरोपकारकेष्वपिदोषंप्रदर्शयति। श्रियइति श्रियोलक्ष्म्योदोलाआंदोलिका
तद्वल्लोलाश्चंचलाः। विषयेभ्योजातास्त्रगादिभ्यउत्पन्नाः येरसाःसुखविशेषाः तेप्रांतेसमाप्तौविरसाः विषादजनकाः। रसोजलंरसोह
वैराग्यंविचिंत्यअस्त्राक्षीन्नेवनीलनीरजदलोपांतातिसूक्ष्मंपुनस्त्वक्स्नात्रांतरितामिषंयदिवपुर्नैतत्प्रजानांपतिःप्रत्यग्रक्षरदस्त्रमिश्रपि ॥त्वया त्यक्तो स्मि॥
शितग्रासग्रहंगृध्रतोगृध्रध्वांक्षवकान्श्वुनोविपततःक्रौंचात्कथंवारयेत्। अपिच। श्रियोदोलालोलाविषयजैरसाप्रांतविरसा
विपद्गेहंदेहंमहदपिधनंभूरिनिधनं। बृहच्छोकोलोकः सततमबलानर्थबहुलास्तथाप्यस्मिन्घोरपथिबतरतानात्मनिरताः। सर
स्वती। वत्सएतद्वैराग्यंत्वामुपस्थितं। तदेतत्संभावय। मनः। क्वासिपुत्रक। वैराग्यमुपसत्यअहंमोः अभिवादयेमनः। वत्सजातमात्रे
वोरसः शृंगारइत्यपि। देहंशरीरंविपदांविपत्तीनांगेहंगृहं। महदपिबहुपिधनंभूरिबहुप्रकारंनिधनंमरणं। उक्तंचाणाक्यनीतौ। अर्थानाम
र्जनेदुःखमर्जितानांचरक्षणे। आयेव्ययेमहदुःखंकथमर्थाः सुखावहाइति। लोकेजनः बृहच्छोकः बहुशोकः अबलाःस्त्रियःसततमन
वरतंअनर्थःस्वरूपनिंदारूपः बहुलायासुताः। तथाचोक्तंहरिवंशे। अधस्ताच्छिद्रितंचर्मदुर्गंधिपरिपूरितं। मूत्रक्लिन्नस्यतस्यार्थेमाराज
रव्याप्तपान्वधीरितितथापिएवंसत्यपिघोरेभयावहेपथिसंसारेरताः इतिबतमहत्कष्टमित्यर्थः। परंतुनआत्मनिरताः नात्मविचारपराइ
त्यर्थः। तथोक्तंविष्णुपुराणे। अमेध्यपूर्णेकृमिराशिसंकुलेस्वभावदुर्गंधेअशुचौसदुवे। कलेवरेमूत्रपुरीषभाजनेरमंतिमूढाविरमंतिपंडिताइति।

संभावय। मानय। मनरत्यादि त्यक्तो स्मी त्वं तं सुगमम्॥

तथाकरोतिपरिष्वजतीत्यर्थः तातपितः। पंथानामिति। पितामाताचबंधुश्चतनयश्चभ्राताचप्रियाचएतेषांयः संयोगः सदासर्वकालंदूरवियोगएव
दूरेवहुविचारणायांवियोगएवसिद्धः उत्पन्नः वियोगोप्रादकृत्वा संयोगोपिवियोगएवकार्य्यकारणयोरभेदादितियदातदाविदुषांतामिमांकः शो
कोदयः वियोगजन्यसंयोगेदृष्टांतानाह। वर्त्मनिमार्गेप्राक्सत्यक्तेचरतांपंथानामिव। नश्यतां भग्नानांक्षितिरुहांतरूणांनद्यामिव। पुष्करे
आकाशेविरुद्धदिक्त्रियवायुप्रेरितानांमेघानामिव। भ्राम्यतामितिपाठेमेघविशेषणम्। जलनिधौसागरेसांयात्रिकाणांपोतवणिजामि
व। नार्य्यस्तामिति। मनः अधरदानींतान्तनम्रगतृष्णिकायांमरुमरीचिकायांकल्पितोयोर्णवस्तत्सपयः जलंतत्प्रायान्तन्मयान्मिथ्या
परिष्वजस्वमां। वैराग्यंतथाकरोतिमनः। वत्सत्वद्दर्शनात्प्रशांतोमेशोकावेशः। वैराग्यं। तातकोत्रशोकावेशः। यतः पंथानामिव
वर्त्मनिक्षितिरुहांनद्यामिवनश्यतांमेघानामिवपुष्करेजलनिधौसांयात्रिकाणामिव। संयोगः पितृमातृबंधुतनयभ्रातृप्रियाणां
सदासिद्धोदूरवियोगएवविदुषांशोकोदयः कस्तदा। मनः। सानंदंदेविएवमेतत्। यदाह वत्सः। संप्रतिहि। नार्य्यस्तानवयौवनाम
धुकरव्याहारिणस्ते द्रुमाः प्रोन्मीलन्नवमल्लिकासुरभयोमंदास्तएवानिलाः। अथोदात्तविवेकमार्जिततमस्तोमंव्यलीकंपुन
स्तानेतान्मृगतृष्णिकार्णवपयः प्रायान्मनः पश्यति॥६७॥
रूपान्पूर्वदृष्टत्वात्पुनः पश्यति। एतान्कान्द्रुत्याहाताः पूर्वपरिचिताः नवयौवनास्तरुण्योनार्य्यः। मधुकराणांव्याहारः संचारोयत्रतादृशास्ते
पूर्वपरिचिताः द्रुमाः वृक्षाः। तएवमंदाअनिलावायवः कीदृशाः वायवः प्रकर्षेणउन्मीलंत्योविकसंत्योनवानूतनामल्लिकास्ताभिः सुरभयः
वहलपरिमलाः कीदृशंमनः उदात्तः स्वेच्छयाप्रवृत्तोयोविवेकस्तेनमार्जितंप्रोञ्छिततंमस्तोमअज्ञानसमूहएवव्यलीकमिंद्रजालंयस्यता
दृशमित्यर्थः। पूर्वंयथार्थतयाऽनुभूतावनितादयोनुरागमुत्पादयंतिस्मतएवेदानींमिथ्यात्वेनपरिज्ञाताः वैराग्यहेतवइतिध्वनितम्॥॥

प्र॰टी॰ उत्पन्नविवेकस्यापि आश्रमग्रहणमावश्यकमित्याह। वत्सयद्यपीति। गृहिणा गृहस्थेन अद्यप्रभृति अद्यारभ्य निवृत्तिः सुखाकारावृत्तिः सहधर्म
५५ चारिणी सहधर्मं चरतीति धर्मचारिणी धर्मपत्नीत्यर्थः। निवृत्तिमतो विरक्तस्य शमादयः अवश्यकाः इत्यभिप्रेत्याह। शमदमेति। उपचरं तु सेवं

सरस्वती। वत्स यद्यप्येवं तथापि गृहिणा मुहूर्त्तमप्यनाश्रमधर्मिणा न भवितव्यम्। तदद्यप्रभृति निवृत्तिरेव ते सहधर्म
चारिणी। मनः सलज्जम्। यदादिशति देवी। सरस्वती। शमदमसंतोषादयश्च पुत्रास्त्वामुपचरं तु। यमनियमादयश्च
55 मात्याः। विवेकोपि त्वदनुग्रहादुपनिबद्ध्या सहयौवराज्यमनुभवतु। एताश्च मैत्र्यादयश्चतस्त्रो भगिन्यो भगवत्या
विष्णुभक्त्या तव प्रसादनाय प्रहिताः स्नाः प्रसादमनुमन्यय। मनः। यदादिशति देवीति मूर्ध्नि विनिवेशिताः सर्व्वा एवाज्ञा
इति सहर्षं पादयोः प्रणमति। सरस्वती॥ एते च यमनियमासनप्राणायामादयः सादरमायुष्मता द्रष्टव्याः। एतैरेव स
हायुष्मान्वैराज्यमधितिष्ठतु। त्वयि च स्वास्थ्यमापन्ने क्षेत्रज्ञोपि स्वां प्रकृतिमापत्स्यते॥ ॥ ॥

तां अमात्याः प्रधानाः युवराज्यस्य कर्म यौवराज्यम्। मैत्रीप्रीतिकरुणामतिरिति चतस्त्रः प्रहिताः प्रेषिताः॥ आयुष्मता भवता। आयुष्मा
न्भवान् स्वास्थ्यं विषयसंबंधराहित्यं। आपन्ने प्राप्ते सति। क्षेत्रज्ञो तदा जीवः स्वां आत्मीयां प्रकृतिं परमात्मभावं। आपत्स्यते॥
प्राप्स्यते॥ ॥ ॥ राम॰
५५

प्रकृतिमापत्स्यतरत्स्कत्तं तामेवोपपादयति। वत्संगादिति। दीव्यति अन्यनिरपेक्षतया प्रकाशते ऽसौ देवः एक एव एकमेवाद्वितीयं ब्रह्मेति श्रुतेः
सुखदुःखादि व्यवस्थातो नानात्वप्रतीतेः कथमेकस्तत्राह। कीदृशो देवः शाश्वतोपि षड्भाव विकारशून्योपि वत्संगात्वद्रुपल्लुप्तविष
यरागात् प्रभवलयौ जन्मम स्कतावेव जरा तया उपप्लुतः पृथक् कृतः या बुद्धिवृत्तयस्तासु नाने व बहुधेव। तत्र दृष्टांतः जलधेः समुद्रस्य
वीचिषु लहरीषु पवनास्फालितासु व्यस्ताभिर्नाना मूर्त्तिर्यस्य एतादृशः रविरिव यथा रविरेक एव लहरीक्षोभान्नाना एवमात्मा बुद्धिप्र
तिबिंबितत्वान्नानेत्यर्थः। उक्तं च। एक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवत् इति। किंच। हे वत्स क
थमपि केनापि प्रकारेण वितता विस्तृताः विषयेषु वर्त्तमानाः वृत्तीः संहृत्य संक्षिप्य तूष्णीं निवृत्तिमालंबसे चेत् अंगीकरोषि चेत् तदास
यतः। वत्संगाच्छाश्वतोपि प्रभवलयजरोपप्लुतो बुद्धिवृत्तिष्वेको नाने व देवो रविरिव जलधेर्वीचिषु व्यस्तमूर्त्तिः। तूष्णीमालंबसे
चेत् कथमपि वितता वत्स संहृत्य वृत्तीर्भात्यादर्शे प्रसन्ने रविरिव सहजानंदसांद्रस्तदात्मा। तद्भवतु ज्ञातीनामुदके दानायनदी
मवतरामः। यदा ज्ञापयति देवी निष्क्रांताः सर्वे। इति प्रबोधचंद्रोदये वैराग्यप्रादुर्भावो नाम पंचमोंकः॥ अतः परं जीवन्मुक्ति
भविष्यति ततः प्रविशति शांतिः॥ शांतिः आज्ञप्तास्मि महाराजविवेकेन यथा वत्से विदितमेव भवत्या॥ ॥ ॥
हजानंदः सांद्रः स्वाभाविक विज्ञानघन आत्मा भाति प्रकाशते। कस्मिन्क इवां प्रसन्ने ति निर्मले आसमंताद्दृश्यते अस्मिन्नित्यादर्शः जलादि त
स्मिन्नित्यर्थः। निर्मल जल तैलादौ यथा रविर्भाति तथा निर्मलासु बुद्धिवृद्धिष्वात्मेत्यर्थः। उपसंहरति। तद्भवत्विति। ज्ञातीनां कामादीनां।
उदकदानाय जलांजलिदानाय। तिलांजलिदाने कृते निरवत्वयविनाशो भविष्यतीति भावः। अवतरामो गच्छामः॥ इति प्रबोधचंद्रोदय व्या
ख्याने प्रकाशाख्ये वैराग्यप्रादुर्भावो नाम पंचमोंकः॥ पंचमेंके वैराग्योत्पत्तिमभिधायेदानीं षष्ठे के प्रबोधोत्पत्तिमभिधातुं जीवन्मुक्तिमु
पक्रम्यतस्याः क्रमं दर्शयितुं शांतिप्रवेशं प्रस्तावयन्। ततरति शांतिर्नाम नाट्येषु वस्तुषु अंतःकरणोपरतिः आदिष्टास्मि आज्ञप्तास्मि। विदितमेव॥

प्र॰ टी॰
५६

अस्तंगतेष्विति। तन्नयेषु कामादिषु अस्तंगतेषु वस्तुवैराग्यं भजते तत वैराग्यभाजि रागशून्ये विशेषेणालीनो महामोहो यस्मात् तादृशे मनसि प्र
शमं मात्यंतिकं शमं प्रपन्ने प्राप्ते सति। पंचसु क्लेशेषु अविद्या अस्मिता राग द्वेषाभिनिवेशाः क्लेशाः मिथ्याज्ञानमविद्या। बुध्यात्मनोरैक्याध्या
स अस्मिता। विषयेच्छा रागः। ससाधने दुःखे अप्रीतिर्द्वेषः। मरणाद्भयमभिनिवेशः। तेषु समं सम काले समीहां वासनां गतेषु संस्कार रूप
तां प्राप्तेषु पुरुषः क्षेत्रज्ञः अभितः सर्वत्र स्वेषु परेषु तत्वावबोधं स्वस्वरूपावबोधं तनोति विस्तारयति। तदुक्तं भगवता। यो न हृष्यति न द्वे
यथा किल। अस्तंगतेषु तनयेषु विलीनमोहे वैराग्यभाजि मनसि प्रशमं प्रपन्ने। क्लेशेषु पंचसु गतेषु समं समीहां तत्वावबोधमभि
56 तः पुरुषस्तनोति। तद्भवती त्वरिततरं देवीमुपनिषदमनुनीय मत्सकाशमानयत्विति शांतिः। विलोक्य। अये एषा बासहर्षं किम
पि मंत्रयंती इत एवागच्छति। ततः प्रविशति श्रद्धा। अये अद्य खलु राजकुलमारोग्यमालोकये। चिरेण मे पीयूषेणलोचनेपू
र्वो। असतां निग्रहो यत्र संतः पूज्या यमादयः। आराध्यते जगत्स्वामी न श्येर्दैर्वानुजीविभिः। शांतिः। उपसृत्य। अंब किं मं
त्रयंती त्वं प्रस्थिता। श्रद्धा। अये अद्य त्यादि पठति। शांतिः। अथ मनसि कीदृशी स्वामिनः पुरुषस्य प्रवृत्तिः॥ ॥

च्छिन्न शोचति न कांक्षतीति। त्वरिततरं अतिशीघ्रं। अनुनीय सप्रेममानयित्वा। मंत्रयंती विचारयंती। राजकुलं राजगृहं। पीयूषेण वाऽमृते
नेव। वस्तुतत्वमुपदिशति। असतामिति। यत्र यस्मिन् राजकुले असतां मोहादीनां निग्रहो दंडः। यत्र यमादयः संतः विवेकानुगामित्वात्पू
ज्याः यत्र जगत्स्वामी श्रीनारायणः वश्यैरप्रमादिभिः देवमीश्वरमनुजीवंतीति देवानुजीविनो जीवास्तैः आराध्यते पूज्यते। अये अ
द्येति। अये अद्य खलु राजकुलमित्यादि। कीदृशी किं प्रकारा स्वामिनः पुरुषस्य मनसि निग्रहार्थं प्रवृत्तिरित्यर्थः॥ ॥ ॥

५६

स्वाम्येव आत्मैव। साम्राज्यं आत्मारामत्वं। अलंकरिष्यतीति अंगीकरिष्यतीत्यथेति। यथायतः आत्मानं परमात्मानं अनुसंधत्ते प्रपंचप्रातिकू
ल्येन परमात्मत्वेनावधारयति ततः देव एव स्वाराट् स्वस्मिन्नात्मसमंताद्राजत इति स्वाराट् आत्मारामः सम्यक् चिदानंदाभेदेन राजते संम्राट्
ज्ञानाद्यानंदाभिन्न इत्यर्थः। तथा च छंदोग्ये स च एष एवं विजानन् आत्मरतिः क्रीड आत्ममिथुन आत्मानंदः स्वस्वराड्भवतीति। अथेति॥
मायायां मूलाविद्यायां कीदृशः कथं अनुग्रहः न कथमपीत्यर्थः। न कथमपीत्युक्तं तदेव शंकते। नन्विति। सर्वानर्थबीजं सर्वेषामनर्था
नां बीजं मूलकारणं अत एव निग्राह्येत्यर्थः। स्थितिः व्यवस्था मायानिग्रहे हेतुमाह। नित्यानित्येति। नित्य आत्मा अनित्यं तो न्यत् एषा वि
याद्शीनद्यस्य ग्राह्यस्य भवति। शांतिः तत्किं स्वाम्येव साम्राज्यमलंकरिष्यति। श्रद्धा। एवमेतत्। यथात्मानमनुसंधत्ते ततो देव ए
व स्वाराट् संम्राट् च भवति। शांतिः। अथ देवस्य मायायां कीदृशो नुग्रहः। श्रद्धा। ननु ग्रहरति वक्तव्ये कथमनुग्राहः शक्यते व
क्तुं देवोपि हि सर्वानर्थबीज नियं मायासर्वथा निग्राह्येति मन्यते। शांतिः। यद्येवं कातर्हि स्वामीं राजकुलस्य स्थितिः। श्रद्धा
श्रणु। नित्यानित्यविचारणा प्रणयिनी वैराग्यमेकं सुहृत्सन्मित्राणि यमादयः शमदमप्रायाः सहाया मताः। मैत्र्याद्याः परि
चारिकाः सहचरी नित्यं मुमुक्षा बलादुच्छेद्या रिपवश्च मोहममतासंकल्पसंगादयः॥ ॥ ॥ ॥

चारणा प्रणयिनी प्रणयः प्रीतिर्यस्याः सा प्राणप्रिया। वैराग्यं वीतरागता एकं मुख्यं सुहृत् हिताहितप्राप्तिपरिहारजनकं। समीचीना मित्रा
णि यमनियमासनध्यानधारणासमाधयः। शमो मनोनिग्रहः। दम इंद्रियनिग्रहः प्रायो ग्रहणात् संतोषः। एते सहायाः सहकारिणो मताः
मैत्री परानुद्वेगजनिका सा आदिर्यासां ताः। उक्तं परिचरंति कुर्वंति ताः परिचारिकाः उक्तकारिण्य इत्यर्थः। मुमुक्षा मोक्षेच्छा सहचरी
सखीत्यर्थः। अतस्तस्मिं स्तहद्धिर्मोहः ममता स्वकीयत्वाभिमानः संकल्पो मनसोभिनिवेशः। संगो विषयसांमुख्यं एते रिपवः बलात् आ
त्मजितास्ता बलात् नित्यं अवश्यं उच्छेद्याः नाशनीया इत्यर्थः॥

दृढ्तां नी धर्म्मानुरागं वक्ष्यति। अथ धर्म्मस्येति। प्रणयः प्रीतिं स्वामिनो धर्म्मस्येति समानाधिकरणे षष्ठी। उत्तरयति पुत्रीति। हे पुत्रि वैराग्यसंनिक
र्षात् वैराग्यसंबंधात् प्रभृति वैराग्यसंबंधं आरभ्य नितांतमतिशयेन इहाऽस्मिंल्लोके अमुत्रपरलोके फलभोगः पुत्रस्वर्गादिसाक्षात्कारस्तत्र
विरस एव विमुख एवेति। तत्र हेतुमाह। तेन सइति। स स्वामी तेन हेतुना पापफलान्नरकादिवत् पुण्यफलादपि स्वर्गाद्विनाशिनो नश्वरात् भयं भज
ति प्राप्नोति। तत् यथेह कर्म्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति श्रुतेः। इतीति। कर्म्मफलानित्यत्वाद्धेतोः समुज्झितः
त्यक्तः कामसमन्वयः फलसंबंधो यस्मिन् एतादृशं सुकृतकर्म्मकणं चवकेनापि प्रकारेण मन्यते नांगीकरोति। काम्यं नच करोति चेन्मा क्रिय
शांतिः। अथ धर्म्मस्य स्वामिनः कीदृशः प्रणयः। श्रद्धा। पुत्रि वैराग्यसन्निकर्षात् प्रभृति नितांतमिहामुत्र फलभोगविरस एव स्वामी। ते
न स ... नरकादिवत् पापफलाद्भयं भजति पुण्यफलादपि नाशिन। इति समुज्झितकामसमन्वयं सुकृतकर्म्मकणं च न मन्यते। किं
त्वसौ प्रत्यक्प्रवणतां स्वामिनो विचिन्त्य कृतकृत्यमिवात्मानं मत्वा स्वयमेव धर्म्मः शून्यव्यापारोऽभूत्॥ ॥ ॥
तां नित्याकरणे प्रत्यवायी स्यादित्याशंक्यानेत्याह। किं त्विति। स्वामिनः स्वात्मनः प्रत्यक्प्रवणतामात्मैकनिष्ठतां विचिंत्य दृष्ट्वा असौ धर्म्मः
कृतं कृत्यं मनोवैमल्यरूपं कार्यं येन तादृशमात्मानं मत्वा स्वयमेव शून्यव्यापारो भूत्। व्यापाररहितो भूदित्यर्थः। एवमुक्तं भवति॥
कर्म्माण्यनेन त्यज्यत इति न किं तु कर्म्मभिरेवायं त्यज्यत इति न नित्याकरणे प्रत्यवायः। तथोक्तं। न कर्म्माणि त्यजेद्योगी त्यज्यते
कर्म्मभिः स्वयं। यतो मोहफलं कर्म्मेति। ननु कर्म्मणां स्वतंत्रफलसाधनानां कथं मनोवैमल्यहेतुत्वं अन्यहेतोरन्यत्री हेतुत्वादिति
चेदुच्यते। संयोगपृथक्त्वन्यायेनेत्यवेहि। धर्म्मपापापमपनुदिति। योगिनः कर्म्म कुर्वंति संगत्यक्त्वात्मशुद्धये इति श्रुतिस्मृत्योः
सत्वा उक्तं चास्मद्गुरुभिः नित्यादिभिराराधिताराध्यपद भगवदनुग्रहा इति विमलमानसः स्वयमेव स्वच्छं जगत्तत्त्वमालोचयतीति॥

अपरे त्वेवं वर्णयंति तमेतं वेदानुवचनेन ब्राह्मणा विविदिशंति यज्ञेन दानेन तपसाऽनाशकेनेति वाक्येनाग्निहोत्रादीनि ज्ञानाय विधीयंते। न च वाक्य
मधिकारांतर संबंधस्य ज्ञानाधिकार संबंधो विनियुक्त विनियोग विरोधादिति। तन्न। पशुप्रकरणे पठितत्वात् खादिरो यूपो भवतीति वा
क्यात् खादिरत्वं क्रत्वर्थमपि तस्मिन्नेव प्रकरणे पठितेन खादिरं वीर्यकामस्य यूपं कुर्वीतेति वाक्यांतरेण वीर्यशेषतया विधीयते तद्वन्न
विनियुक्त विनियोग विरोध इत्यलं विस्तरेण। सोपसर्गस्य महामोह वृत्तांत शेषस्य शांतिद्वारा प्रश्नमवतारयति। शांतिः अपेति। निलीय। आ
च्छाद्य। तेषामुपसर्गाणां प्ररोचनाय प्रतारणाय मधुमत्या कया विविधया कापि कथनीयरूपा। उपसर्गाः अंतरायाः प्रतिभादयः। प्रतिभः श्रव
शांतिः। अपतानुपसर्गान् गृहीत्वा महामोहो निलीय स्थितमेषां को वृत्तांतः। श्रद्धा। पुत्रि तथा दुरवस्थागतेनापि महामोह हतकेन
स्वामिनः परोचनाय मधुमत्या विद्यया सहोपसर्गाः प्रेषिताः अयं चाभिप्रायः। यद्येतेष्वासक्तः स्वामी विवेक उपनिषत् चिंतामपि
न करिष्यतीति शांतिः ततस्ततः। श्रद्धा। ततस्तैर्गत्वा कापि स्वामिन्येंद्रजालिकी विद्योपदर्शिता। तथाहि। शब्दानेष शृणोति यो
जनशतादाविर्भवंत्यश्रुतास्तास्ता वेदपुराणभारतकथास्तर्कादयो वाङ्मयाः। गथ्नाति स्वयमिच्छया शुचिपदैः शास्त्राणि काव्या
नि वालोकान्भ्राम्यति पश्यति स्फुटरुचो रत्नस्थलीर्मेरवीः॥ ॥
णो देवो मम मा वस्त्वं तैर्धा परो। पंचैने योगिनां योगविघ्नं कुर्वंति सर्वदेति दत्तात्रेयोक्तक्रमा। एतेषूपसर्गेषु कापि कथनीयरूपा ऐंद्रजालिकी अ
विद्यमानार्थप्रकाशरूपा शब्दानिति एष पुरुषो योजनानां शतं क्रोशचतुष्टयेनैकं योजनमेवं योजनशतं शब्दान् शृणोति आकर्णय
ति। तास्ताः अतिप्रसिद्धाः। अश्रुताः वेदपुराणभारतकथाः आविर्भवंति प्रकटी भवंति। वाङ्मयाः वाग्विकारास्तर्काः आविर्भवंति स्फुरंति
शुचिभिर्निर्दूषणैः शुद्धैः पदैः शास्त्राणि काव्यानि वा स्वेच्छया स्वयं गथ्नाति रचयति। लोकान्भूरादीन्भ्राम्यति गच्छति। मेरोरिमा मेरव्य
स्ताः रत्नस्थलीः रत्नखचितानुपरितनभूभागान् स्फुटरुचो दीप्यमानान्पश्यति॥ ॥

प्र॰टी॰ मधुमत्याचेति। मधुमत्यासिध्याकल्पितायाभूमिस्तामापन्नः प्राप्तः सन्रति अध्याहारः स्थानाभिमानिनीभिर्देवताभिरुपछंदयंते प्रलोभ्यंते लोभनमेवद
५८ र्शयति भोरहेति अनुपधरणीयः सहजसुंदरः। त्वामुपस्थित इति विद्याधरीजनः त्वांउपस्थितः प्राप्तः कीदृशो विद्याधरीजनः विविधानानाप्रकाराश्च
ते विलासाः विभ्रमाश्च नेत्रकरचरणांगहावभावललितचेष्टाः लावण्यंच वस्त्रकनकमौक्तिकाद्याभरणानुलेपनपत्रभंगिरचनारूपं तदेपुण्यंका
र्ये कारणोपचारः तन्मयस्तत्प्रधानः। पुनः कीदृशो विद्याधरीजनः। दध्यावशीदिमंगलार्थव्यग्राः पाणयो यस्य सः प्रणयपेशीतो कर्त्तव्यायांपेश

मधुमत्याचभूमिमापन्नः स्थानाभिमानिनीभिर्देवताभिरुपछंदयंते। भोरहोपविश्यतां। नात्रजन्ममृत्युरनुपधिरमणीयोदेशएषः
५९ त्वामुपस्थितो विविधविलासलावण्यमयोमंगलार्थव्यग्रपाणिः प्रणयपेशलो विद्याधरीजनः। तदेहियतोत्र। कनकसिकतस्थलीः
स्रवंतीः पृथुजघनाकमलाननाघनोरूः। मरकतदलकोमलावनालीर्भज निजपुण्यजितांश्च सर्वभोगान्। शांति। स्ततस्ततः। श्र
द्धा। पुत्रितदाकर्ण्यमाययाश्लाघ्यमेतदित्युक्तं मनसाचानुमोदितं संकल्पेन प्रोत्साहितं स्वामीसंमतिपथमिवापन्नः। शांतिः
सखेदं पुनरपितामेवसंसारवागुरामभिपतितः स्वामी॥ ॥

लश्चतुरो विद्याधरीजनः। कनकेति। कनकस्यसुवर्णस्यसिकतावालुकातयुक्तानिस्थलाभियासुताः। स्रवंतीः। नदीः भजसेवय। पृथुज
घनाः स्थूलनितंबाः कमलाननाः पद्मवदनाः घनाः निबिडाः उरवोयासांताः भज। मरकतंरत्नविशेषस्तस्यदलानिशकलानितद्वत्कोमलाः
वनालीः वेनश्रेणयः भज। निजेनस्वेनपुण्येनजितान् निर्जितान्सर्वभोगान् विषयानंदाश्चभज। श्लाघ्यमतिसमीचीनं। अनुमोदितंए
वमेवेदंनान्यथेत्युक्तंप्रोत्साहितम्। सद्योगंकृतं। भवतुकोविरोधइत्यंगीकारः संमतिः। वागुरांस्थूलरज्जुभिर्निर्मितंजालम्॥ ॥

नखलु नखलु नहि तहीत्यर्थः॥ परिपार्श्ववर्त्तिना निकटवर्त्तिना॥ तर्केण सदसद्विचारेण सर्व्वान् मायामनःसंकल्पादीन् क्रोधावेशेन को
पाविर्भावेन कषायिते आरक्तीकृते नेत्रयस्यां क्रियायां यथा स्यात्तथा आलोक्याभिहितः उक्तः स्वामी। विमुक्त इत्याह स्वामिन्निति। वि
षया एव आमिषं मांसं तस्य ग्रासे गृध्नाति अभिलषतीति तेगृध्नवः तैः आस्थानी धूर्त्तकैः सभाप्रतारणाय गृहीतबकव्रतैः तैरेव पूर्व्वपरि
श्रद्धा। नखलु नखलु। शान्तिः। ततस्ततः। श्रद्धा। ततः परिपार्श्ववर्त्तिना तर्केण तान् सर्व्वान् क्रोधावेशकषायितनयनमालोक्याभिहितः स्वामी। स्वा
मिन् किमेवमभिविषयामिषग्रासगृध्नुभिरास्थानीधूर्त्तकैः पुनरपि तैरेव तथैव विषमविषयांगारेषु निपात्यमानमात्मानं नावबु
ध्यसे। ननु भो। भवसागरतारणाय यथाविधिराद्योगतरिस्त्वयाश्रिता। अधुना परिमुच्यतां सदा तत्कथमंगारनदीं विगाहसे। शान्तिः। ततस्तत
तः। श्रद्धा। ततस्तद्वचनमाकर्ण्य स्वस्ति निषयेभ्य प्रत्यवधायानधीरिता मधुमती। शान्तिः साधु साधु। अयमत्र प्रस्थितास्ति भगवती।
श्रद्धा। आदिष्टाहं स्वामिना यथा विवेकं प्रद्रष्टुमिच्छामि। तत्त्वरतां भगवती। श्रद्धा। तदहं राजसन्निधिं प्रस्थिता। शान्तिः। अहमपि
महाराजेनोपनिषदमानेतुमादिष्टा। तद्भवतु स्वामिनियोगं संपादयावः॥ ॥ इति निष्क्रान्ते॥

चितेष्वेनात थैव उक्तप्रकारेण। विषमा दुःसहाः विषया एवांगारास्तेषु नावबुध्यसे न जानासि। भवेति। भव एव संसार एव सागरः समुद्रस्त
स्मात्तारणाय पारागमनाय यथा योग एव तरणिर्नौका त्वया आश्रिता प्राप्ता अधुना इन्द्रानीं तां नौकां न चिरात् शीघ्रमेव भवद्दातयोगविद्याभू
तादहंकारात् परिमुच्य त्यक्ता अंगारनदी विषमविषयप्रवाहा तां कथं विगाहसे आलोडयसि। तद्वचनमाकर्ण्य तर्कवचनं श्रुत्वा। अवधी
रिता तिरस्कृता। स्वामिना पुरुषेण स्वामिनियोगं स्वामिनो विवेकस्य नियोगमाज्ञां। संपादयावः करिष्यावः॥ ॥६९॥

प्र॰टी॰ तीर्णा इति। संसार एव वारां जलानां निधिः समुद्रस्तस्य पारे तीरं मया अधुना इदानीमवाप्तकल्पं प्राप्तप्रायं मयेति सर्वत्र योजनीयम्। अनेकानर्थव्या
५९ प्तस्य संसारनीरनिधेः कथं पारप्राप्तिरित्यत आह। तीर्णाः क्लेशमहोर्मय इत्यादि। क्लेशाः अविद्याअस्मितादयः पंच त एव महान्त ऊर्मयो
लहर्यः तीर्णाः। भीमास्त्रासहेतवः ममत्वमेव भ्रमाः आवर्त्ताः परिहृताः वंचिताः॥ मित्रं च कलत्रं च स्त्री बंधवश्च सुहृदः त एव मकराः मत्स्या

प्रवेशकः। ततः प्रविशतीति पुरुषः। पुरुषो विचिंत्य सहर्षं अहो महात्म्यं देवा विष्णुभक्तेः यत्प्रसादान्मया। तीर्णाः क्लेशमहोर्मयः
59 परिहृता भीमा ममत्वभ्रमाः शांता मित्रकलत्रबंधुमकरग्राहग्रहस्तयः। क्रोधौर्वाग्निरपाकृतो विघटितास्तृष्णालताग्रंथयः पा
रे तीरमवाप्तकल्पमधुना संसारवारांनिधेः। ततः प्रविशति उपनिषच्छांतिश्च। उपनिषत्। सखि कथं तथा निरनुक्रोशस्य स्वामि
नो मुखमालोकयिष्यामि। येनाहमितरजनयोषेव सुचिरमेकाकिनी परित्यक्ता। शांतिः। देवि कथं तथाविधविपत्पतितो देव
उपालभ्यते। उपनिषत्। सखि न दृष्टा त्वया मे तादृशी दशा येनैवं ब्रवीषि॥

ग्राहाः शिशुमारास्तेषां ग्रहः ग्रहणं धारणं तत्पूर्विका ग्रस्तयो ग्रासाः। शांताः प्रशमं गताः। क्रोध एव और्वाग्निर्वडवानलः अपाकृतः
निराकृतः। तृष्णैव लता ग्रंथयः विघटिताः वियोजिताः। श्रीमद्भागवद्भक्तेर्न किमपि दुर्लभमिति भावः। निरनुक्रोशस्य निर्गतोऽनु
क्रोशो दया यस्मान्निर्दयस्येत्यर्थः॥ मुखमालोकयिष्यामीत्यनेन मानिनीत्वमादर्शिता देवीति संबोधनेन त्वमतिसाधीयसी त्वयि दं
दमस्मिन्समये अनुचितमिति भावः। किंचित्कोपं परिहाय न वदति सखि न दृष्टा त्वयेति॥ ॥ राम॰
५९

तांदशामेवश्रावयति। श्रणु। बाह्वोरिति। अहंकैः कैः दुरितैः पापैः दुर्व्विदग्धैर्दुष्टबुद्धिभिः हतंनष्टंयद्विधिबलंदेवबलंतस्मात्निर्भाग्यत्वात्सपदितत्काल
मेवदासीकर्त्तुंस्वाधीनांसंपादयितुंनर्हितास्तत्किंताअपितुसर्व्वैरपीत्यर्थः। निर्भाग्यत्वेहेतुः विवेकेदूरसंगतेसति। दासीत्वसंपादकमाह। बाह्वो
र्हस्तयोर्द्दलिताश्चूर्णिताः मणयोयासांताः कंकणानांहस्तभूषणानांश्रेणयः पंक्तयः भग्नाः। चूडारत्नस्यमस्तकमणेर्ग्रहः ग्रहणंतेनयाः निकृतयः
न्यक्काराः केशग्रहणाकर्षणरूपास्तिरस्काराइतियावत्।। ताभिर्द्दूषितः शोटितः केशपाशोधम्मिल्लः। एवंचसतिइदंफलितंविवेकंविनान्यायमाः
श्रणुबाह्वोर्भंगाद्दलितमणयःश्रेणयः कंकणानांचूडारत्नग्रहनिकृतिभिर्द्दूषितः केशपाशः। कैः कैर्न्नाहंहतविधिबलादीहितादुर्व्विदग्धै
र्द्दासीकर्त्तुंसपदिदुरितैर्दूरसंस्थेविवेके। शांतिः। सर्व्वमेतन्महामोहस्यदुर्व्विलसितम्। नात्रदेवस्यापराधः तेनहिमनः कामादिद्वारेणप्र
बोधयतात्वत्तोदूरीकृतोविवेकः। एतदेवकुलस्त्रीणांनैसर्गिकंशीलम्। यद्विपन्नस्यस्वामिनः समयप्रतीक्षणमिति। तदेतदि
हदर्शनप्रियालापेनसंभावयसंभावयदेवं। संप्रत्यपहताविद्विषः संपूर्णास्तेमनोरथाः। उपनिषत्। सखिमंप्रत्यागच्छंतीवत्सयागी
तयाहंरहस्युक्ता।। यथा।। भर्त्तास्वामीचपुरुषस्त्वयायथाप्रश्नउत्तरेणसंभावयितव्यः तथाप्रबोधोत्पत्तिर्भविष्यतीति। तत्कथंगुरूणा
मध्यक्षंयथार्थंकरिष्यामि। शांतिः। देवि अविचारणीयमेतद्वाक्यंभगवत्यागीतायाः।। ।। ।।

दग्धचित्तेः। उपक्रमोपसंहाराभ्यांश्रुतितात्पर्य्यी। नभिज्ञैरुपनिषदउपष्णान्यंतएव। दुर्व्विलसितं। अपराधाभावंव्यनक्ति तेनहीति। तेनहि। हिर
वधारणे। महामोहेनैवकामादिद्वारेणमनःप्रबोधयताविवेकोदूरीकृतइतियोजना। नैसर्गिकंनिरुपाधिकं। स्वाभाविकमितियावत्।
समयप्रतीक्षणंकालाकांक्षणम्।। कुलटास्त्वन्यमाश्रयंतेस्वामिनोविपदमालोक्यनसमयंप्रतीक्षंतइतिभावः। संभावय २ संमानय २।
अपहताः मारिताः। उपनिषदर्थप्रतिपादकतयागीतांविशिनष्टिवत्सयेति। रहसिनिर्ज्जनदेशेगुरूणांविवेकप्रवर्त्तकानांश्वशुरादीनां।
अध्यक्षंअग्रतः।। ६१।।

प्र॰ टी॰ ६० विवेकस्वामिन इति कर्मणि षष्ठी विवेकरूपं स्वामिनं प्रति अभिरक्त उक्त इत्यर्थः। परिक्रामति भ्रमरिकां कृत्वा गच्छतीत्यर्थः। अपि वत्से श्रद्धे गृ-
हीतोपदेशैव गृहीता शैवा कच्चिदिवेति कुत्र कुत्रेत्यर्थः। अनुप्रविष्टा अंतर्गता तर्कविद्याया इति पंचमी। प्रस्तोष्यति वर्णयिष्यति कथयिष्य-
तीति यावत्। तदागच्छतु देवो विवेकः पुरुषनिकटमिति शेषः। एषः स्वामी पुरुषः विविक्ते एकांते प्रक्रमविरुद्धः उपक्रमविरुद्धः। समुदाचारः

अयमेव चार्थो भगवत्या विष्णुभक्त्या विवेकस्वामिनो निरुक्तः। तदेहि संभावय दर्शनेन भर्त्तारमादिपुरुषं च। उपनिषत्। यथाव-
दति प्रियसखीति परिक्रामति। ततः प्रविशति राजा श्रद्धा च। राजा। वत्से अपि द्रक्ष्यति शांतिः प्रियामुपनिषदम्। श्रद्धा देव गृहीतोपदे-

शैव शांतिर्गता कथं तां न द्रक्ष्यति। राजा कच्चिदिव। श्रद्धा। देव प्रागेव कथितमेतद् देव्या विष्णुभक्त्यासीत्। यथा मंदराभिधाने शै-
ले विष्णोरायतने देव्यां गीतायां तर्कविद्या भयादनुप्रविष्टेति। राजा कथं पुनस्तर्कविद्याया भयम्। श्रद्धा देव तमर्थं सैव प्रस्तोष्य-
ति तदागच्छतु देवः। एष स्वामी त्वदागमनमेव ध्यायन् विविक्ते वर्त्तते। राजा। उपसृत्य स्वामिनमभिवादये। पुरुषः। वत्स प्रक्रमविरुद्धो
यं समुदाचारः। यतो ज्ञानवृद्धतया भवानेवास्माकमुपदेशदानेन पितृभावमापन्नः। कुतः। पुरा हि धर्माध्वनि नष्टसंज्ञाः देवास्त-
मर्थं तनयानपृच्छन्। ज्ञानेन सम्यक् परिगृह्य चैतान् हे पुत्रकाः संशृणुतेत्यवोचयन्। तद्भवानपि तत्त्वेनास्मासु वर्त्ततामित्येष ए-

शिष्टाचारः। पितृभावं पितृत्वं। आपन्नः प्राप्तः। पुरा हीति देवाः भूदेवाः पुरा हि पूर्वकाले हि निश्चितं धर्माध्वनि धर्ममार्गेपानष्टसंज्ञाः सुप्त-
बोधाः तमर्थं तनयान्पुत्रानपृच्छन् ते च तनया एतान् प्रश्नकर्तॄन् ज्ञानेन हेतुना परिगृह्य स्वीकृत्य संशृणुत सम्यगधिगच्छत इत्यवोचन्
अवदन्। तथोक्तं मनुना। अध्यापयामास पितॄन् शिशुरांगिरसः कविः। पुत्रका इति होवाच ज्ञानेन परिगृह्य तानिति। एतेनान्यसंबंधापेक्ष-
या ज्ञानसंबंधस्य श्रेष्ठत्वं दर्शितं। ज्ञानसंबंधात् सितत्त्वमेव त्वयि उचितमित्याह तद्भवानिति॥ ॥ ॥ ॥

राम॰ ६०

देवेन विवेकेन। स्वामी पुरुषः। अनुग्रहेति। अनुग्रह विधौ अनुग्रहे कर्त्तव्ये देव्या उपनिषदः मातुश्च अन्तरं भेदः महत् महान् महदंतरमेवाह। मातेति। निब
ध्नाति संसारे प्रक्षिपति। देवी उपनिषत् बंधं संसारं निकृतति छिनत्ति। क्व कुत्र। नीतानीति। अमूनि एतानि वासराणि दिनानि मठाः अवधूतनि।
~~निबध्नाति संसारे प्रक्षिपति। देवी उपनिषत् बंधं संसारं निकृतति~~ वासस्थानानि चत्वराणि नानाविधजनोपवेशनस्थानानि। शून्यदेवालयेषु मूर्खाश्च
ते मुखराश्च वाचालास्तैः सह नीतानि अतिवाहितानि स्तवं महिमानं। न खल्विति। जानंतीति शेषः। तर्हि कथमतिवाहितानीति पृच्छति किंत्विति।
शांतिः। एवं देवि देवेन सह स्वामी विविक्ते वर्त्तते तदुपसर्प्प तु देवी। उपनिषत्। उपसर्प्पति। शांतिः। स्वामिन्नेषा उपनिषद् देवी पादवंदना
यागता। पुरुषः। न खलु २। यतो मातेयमस्माकं तत्त्वावबोधोदयेन तदेषैवास्माकं नमस्या॥ अथवा अनुग्रहविधौ देव्या मातुश्च मह
दंतरम्॥ माता गाढं निबध्नाति बंधं देवी निकृंतति। उपनिषत्। विवेकमालोक्य नमस्कृत्य दूरे समुपविशति। पुरुषः। अंब कथ्यतां॥
क्व भगवत्यानीता एते दिवसाः। उपनिषत्। स्वामिन्। नीतान्यमुभि मठचत्वरशून्यदेवीगारेषु मूर्खमुखरैः सह वासराणि। पुरु
षः। अथ ते जानंति किमपि भगवत्यास्तत्त्वं। उपनिषत्। न खलु। किंतु। तेस्वेच्छया मम गिरां द्रविडांगनोक्तवाचामिवार्थम
विचार्य विकल्पयंतीति न केवलं तेषां परार्थग्रहणप्रयोजनमेव मद्विचारणम्॥ ॥ ॥ ॥
पूर्वश्लोकस्य उत्तरत्वेनोत्तरार्द्धमवतारयति तेस्वेच्छयेति। ते मूर्खमुखराः स्वेच्छया गुरूपसत्तिं विना मम गिरां वाचां अर्थमविचार्य विकल्प
यंति अन्यथयंति। तत्र दृष्टांतः द्रविडाः द्रविडदेशस्थाः पुरुषास्तेषां अंगनाः स्त्रियस्ताभिरुक्ताः वाचस्तासामिव। द्रविडस्त्रियः पुरुषापे
क्षया स्पष्टवाचो भवंतीति। द्रविडांगनादृष्टांतिताः। ननु तर्हि तेषां बहिर्मुखानां उपनिषदर्थविचारो व्यर्थ इत्याशंक्याह। तेनेति। तेषां ब
हिर्मुखानां मद्विचारणं परेषामर्थोधनं तस्य ग्रहणं तदेव प्रयोजनं परधनग्रहणार्थमित्यर्थः॥ ६९॥ ॥ ॥ ॥

पुनरपिआगच्छं त्वां मया कानिचिद्वासराणि अतिक्रमणीयानि मनि विचार्य्य यज्ञविद्यासमीपमागतमित्याह। कृष्णाजिनेति। अथानंतरं मया अ
ध्वनि मार्गे यज्ञविद्या दृष्टा। कीदृशी यज्ञविद्या कृष्णाजिनं कृष्णमृगचर्म्म। अग्नयो गार्हपत्यादयः समिधः आज्यं घृतं जुहूः स्रुवः आदिप
दादुपभृद्ध्रुवा रत्यादीनि पात्राणि तैः तथा इष्टिः दर्शपूर्णमासेष्टिः पशुः निरूढपशुः। सोमोग्निष्टोमः मुखमाद्यो येषां तादृशा मखाः यागा

पुरुषस्ततस्ततः। उपनिषत्। ततः कदाचित्। कृष्णाजिनाग्निसमिदाज्यजुहूस्रुवादिपात्रैस्तथेष्टिपशुसोममुखैर्मखैश्च। द
ष्टा मया परिवृता किल कर्म्मकांडव्यादिष्टपद्धतिरथाध्वनि यज्ञविद्या। पुरुषस्ततस्ततः। उपनिषत्। ततो मया चिंतितं। अ
पिनामैषा पुस्तकभारवाहिनी मेऽलसस्यापि तत्त्वं। अतएव तस्याः सन्निधौ कानिचिद्वासराणि नयामि। पुरुषस्ततः। उपनिषत्। त
तस्तामहमुपस्थिता तया चाहमुक्तास्मि। भद्र किं ते समीहितमिति। ततो मयोक्तं। आर्य्ये अनाथास्मि त्वयि निवस्तुमिच्छा
मीति। पुरुषः। स्ततस्ततः। उपनिषत्। ततस्तयोक्तं भद्र किं ते कर्म्मेति। पुरुषस्ततःस्ततः। उपनिषत्॥ ॥ ॥

सैः किल निश्चयेन परिवृता व्याप्ता। पुनः कीदृशी यज्ञविद्या। कर्म्मकांडे व्यादिष्टा उपदर्शिता पद्धतिरितिकर्त्तव्यताक्रमो यस्याः सा। चिंतितं विचा
रितं किं तदाह अपीति। एषा यज्ञविद्या। नयामि परिकल्पयामि। तामहमुपस्थिता प्राप्ता। समीहितमीप्सितं। त्वयि त्वत्समीपे किं ते कर्म्मे
ति। तेतव किं कर्म्म कार्यमित्यर्थः॥६॥

विमुक्तमित्याह। तंपुरुषं आत्मानं अहमिस्कृत्तमपुरुषसंबंधाल्लभ्यः प्रस्तोमि। प्रकर्षेणस्तोमि गिरूपयामि। तंकं यस्माद्विश्वंजगदुदेति उत्पद्यते॥
यत्रयास्मिन् आत्मनिरमते। संतुष्यति। यस्मिन्पुनरंते लीयते लयं प्राप्नोति। यस्यभासा ज्योतिषा जगद्विभाति प्रकाशते। यस्याभासा सर्वमि
दं विभातीतिश्रुतेः। यन्महः यस्यतेजः सहजानंदोज्वलं। सह जायत इति सहजः स्वाभाविक। यदानंदः सुखं तद्रूपउज्वलः प्रकाशोयस्यनित्यसुखप्रका
शमित्यर्थः। शांतं विकारशून्यं। शाश्वतमविनाशि। अक्रियं क्रियारहितं। पुनस्तं के कृतिनः कुलाशये भूतेश्वरं भूतानामीश्वरं नियंतारं प
रमात्मानं अपुनर्भवाय संसारविछित्तये यांति प्राप्नुवंति। किं कृत्वा द्वैतभेदः सएवध्वांतं तमः अपास्यतिरस्कृत्य। यज्ञविद्यास्वसिद्धांतमावि
ततोमयोक्तं। यस्माद्विश्वमुदेति यत्ररमते यस्मिन्पुनर्लीयते भासायस्य जगद्विभाति सहजानंदोज्वलं यन्महः। शांतं शाश्वतमक्रि
यं यमपुनर्भवाय भूतेश्वरं द्वैतध्वांतमपास्य यांति कृतिनः प्रस्तोमितंपूरुषम्। ततस्तयोक्तम्। यज्ञविद्याविचिंत्या। पुमानकर्त्ता कथ
मीश्वरो भवेत् क्रियाभवोछेदकरी न वस्तुधीः। कुर्वन्नृक्रियाएव भवो भवछिदः शांतसमाः शांतमना जिजीविषेत्। तन्मे नातिप्रयोज
नं भगवत्याः परिग्रहेण। तथापि यदि कर्त्तारं मोक्तारं पुरुषं स्तौति कियत्कालमत्रवस्तु मिच्छामि कोदोषः॥ ॥ ॥
क्करोति। पुमानिति। पुमान् आत्मा अकर्त्ता कर्तृत्वशून्यः कथमीश्वरो भवेत्। न कथमपीत्यर्थः। तवमते ईश्वरत्वं कर्तृत्वाद्युपाधिविशिष्टं कर्तृ
त्वाद्यभावे तदेवन सिध्यतीतिभावः। ननु तर्हि भूतेश्वराराधनं विना कथं संसारनिरासस्तत्राह। क्रिया ज्योतिष्टोमादिरूपा सैवभवोछेदकरी
संसारनाशकरी। अपामसोमममृता अभूमेतिश्रुतेः। ननुवस्तुज्ञानमेव संसारनिरासकरमिति। उपनिषद्ब्रह्मस्वंनिरस्यति न वस्तुधीरिति।
वस्तु कालत्रयाबाध्यं परंब्रह्म तदाकाराधीस्तत्साक्षात्कारः नभवछेदहेतुरित्यर्थः। कर्मकुर्वतां जीवनमपि सुंदरमित्याह। कुर्वन्निति। अतए
व हेतो। नरो जीवः भवछिदः संसारविछेदिकाः क्रियाः कर्म्माणि कुर्वन्नेव शांतमनाः सावधानचित्तः शतंसमाः वर्षाणि जिजीविषेत् प्राणा
न्धर्त्तुमिछेत् कर्म्मिणामेव। जीवनमन्येषांभस्त्रेवनिःश्वसितमितिभावः॥ध॥

प्र॰टी॰ धूम एवांधकारस्तेन श्यामलिता मलिना जाता दृक् दृष्टिर्यस्याः सा तस्याः दुःप्रज्ञत्वं दुर्बुद्धित्वं दुःप्रज्ञत्वमेवाह। येनैवमिति। येन हेतुना एवं पूर्वो
६२ क्तप्रकारेण कुतर्केण असतर्केण दुपहता विमोहिता। न कीसत्वं व्यनक्ति अयः स्वभावेति। ईशितुः। ईश्वरस्य माया मूलाविद्या जगति भुवना
नि तनोति उत्पादयति। मायाप्रेरकत्वेन ईश्वरस्यापि चेष्टावत्वमित्याशंक्य मायां विशिनष्टि। कीदृशी माया। विश्वेक्षितुः विश्वसाक्षिणः
ईक्षितेन ईक्षणमात्रेण ईरिता प्रेरिता। भगवदीक्षणप्रेरितायाः मायायाः स्रष्टृत्वं न तु सिसृक्षाद्युपाधिविशिष्टस्य कर्तृत्वमीश्वरस्येति भा
वः। नन्वचेतनं चेतनाधिष्ठितमेव कार्यकरं दृष्टं यथा चक्षुरादि माया त्वचेतना कथमन्येषामीक्षणमात्रेण करोतीति वदन् न लज्जसे इत्या
62 राजासोपहासं। अहो धूमांधकारश्यामलितदृशो दुःप्रज्ञत्वं यत् अविद्यायाः। येनैवं कुतर्कोपहता। अयः स्वभावादचलं वलीच्च
लत्यचेतनं चुंबकसन्निधानेन। तनोति विश्वेक्षितुरीक्षितेरिता जगंति माये श्वरतेयमीशितुः॥ तस्मात्तमोधानामेवयमीदृशी
दृष्टिः। अप्रबोधप्रभवं च संसारं कर्म्मभिः शामयंतीयत्नविद्या नूनमंधतमसमंधकारेणापविनीषति॥ ॥ ॥

शंकादृष्टांतेनोपपादयति। अयइति। स्वभावादचेतनं चेतनाशून्यमत एव अचलं जंगमयः लोहं चुंबकपाषाणस्य सन्निधौ समीपे यथा
बलाच्चलति एवमचेतना ऽवस्तुभूतापि माया विश्वेक्षितुरीक्षणेरिता जगन्निर्मातीत्यमेवेश्वरता ईश्वरस्येति भावः। इह जगति य
दज्ञाना रज्जुभुजंगाद्या विर्भवति तत् ज्ञानादेव तिरोभवति न कर्म्मभिः विरोधादित्यभिप्रेत्याह। अप्रबोधेति। अप्रबोधादज्ञानात्प्रभ
वो जन्म यस्य तादृशं संसारं कर्म्मभिः शामयंतीयत्नविद्या नूनं विश्वये नं तमसैवांधतमसः अपनेतुं तिरोधातुमिच्छतीत्यर्थः॥ का
रणाभावे पि कार्य्यं भवत्विति जल्पंतीमंदमतेति भावः॥ ॥ ॥ राम॰ ६२

ननु आत्मज्ञानादाविर्भूतं विश्वमात्मविज्ञानादेव तिरोभवति। ज्ञानाज्ञानयोरेव वाध्यबाधकभावो दृष्टः शास्त्रेण कर्मज्ञानयोः। यतो ज्ञानमज्ञा
नस्य घातकमिति श्रुतेः। अतो वस्तुज्ञानादेवाज्ञाननाश इत्यभिप्रेत्य राजा आह। स्वभावेति। स्वभावलीनानि नश्वराणि तमः अज्ञानं तन्मयानि
तत्स्वभावानि एतादृशानि सप्तभुवनानि यः स्वरूपप्रकाशेन प्रकाशयेत् प्रकटीकुर्यात् तमेव स्वप्रकाशं विश्वसाक्षिणं विद्वान् तमेव जानानः अ
तिमृत्युं मृत्युमतिक्रान्तं परं ब्रह्म एति प्राप्नोति। इतरभिन्नाज्ञानं मोक्षहेतुरिति मतं निरस्यति नान्य इति भवः संसारस्तस्माद्या मुक्तिः तद्धेतुः पंथाः उ
पायः नान्योस्तीत्यर्थः। तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुतेः। विमृश्य विचार्य। दुर्वासनोपहते दुर्बुद्धिग्रस्ते। अतेवा

स्वभावलीनानि तमोमयानि प्रकाशयेद्यो भुवनानि सप्त। तमेव विद्वानतिमृत्युमेति नान्योस्ति पंथा भवमुक्तिहेतुः। पुरुषः। ततस्ततः।
उपनिषत्। ततो यज्ञविषया विमृश्योक्तम्। सखि त्वत्सन्निकर्षाद्दुर्वासनोपहते रस्मदंतेवासिभिः कर्मसु श्लथादरैर्भवितव्यं। त
त्प्रसीदतु भवती स्वाभिलषितदेशगमनाय। पुरुषस्ततस्ततः। उपनिषत्। ततोहं तामतिक्रम्य प्रस्थिता। पुरुषस्ततस्ततः। उपनिषत्।
ततः कर्मकांडसहचरी मीमांसा मया दृष्टा। विभज्य कर्माण्यधिकारभांजि श्रुत्यादिभिश्चानुगता प्रमाणैः। अंगैर्विचित्रैरभियोज
यंती प्राप्तोपदेशैरतिदेशगैश्च॥

सिभिः शिष्यैः। श्लथादरैर्मंदादरैः। स्वयाभिलषित इष्टः। प्रस्थिता निर्गता। मीमांसास्वरूपमिह विभज्येति। मीमांसा दृष्टेति पूर्वपंक्तिकास्यप
देषान्वयोस्ति स श्लोके संबध्यते कीदृशी मीमांसा। अधिकारः कर्मफलभागित्वरूपं तं भजते तानि ज्योतिष्टोमादीनि कर्माणि विभज्य फलभे
दात्कर्मभेदं प्रतिपाद्य अंगैः प्रयाजानुयाजादिभिर्विचित्रैर्नानाभेदभिन्नैः सन्निपत्यारादुपकारिभिः प्राप्तोपदेशैः साक्षादुपदिष्टैः अतिदे
श अन्यत्र श्रुतस्यान्यत्र संबंधः तेनापि प्रमाणेन प्राप्तैः अभियोजयंती उपकुर्वाणा। पुनः कीदृशी मीमांसा श्रुत्यादिभिः श्रुतिवाक्यलिंग
प्रकरणस्थानसमाख्यादिप्रमाणैः अनधिगतार्थबोधकैः अनुगता युक्ता॥ ॥

अभ्यर्थितवती। याचितवती। पार्श्ववर्त्तिनां समीपवर्त्तिनां। किमभिहितं तदाह। अस्येवेति। लोकांतरसुखं स्वर्ग्गसुखादिरूपं तदुपभोगयोग्यस्य
पुरुषस्य उपनयने प्रतिपादने उपयोगः प्रयोजनं अस्या उपनिषदः आस्ये वेति योजना। ततः किं तत्राह॥ तदिति तत्तस्मा द्धेतोः एषा उपनिषत्क
र्म्मणि उपयुक्ता धियतां क्रियतामित्यर्थः। एतत्कर्म्मोपयुक्तत्वं अनुमोदितमेव साधु साध्विति स्वीकृतमेव। प्रसिद्धा ख्याता प्रतिष्ठा यस्य तेन।
मीमांसायाः हृदयस्य तात्पर्य्यस्याधिदेवतं तेन अधिष्ठातृदेवतयेत्यर्थः। कुमारिलस्वामिना भट्टाचार्य्येण प्रोक्तं प्रतिपादितं किं प्रतिपादितं
पुरुषस्तत स्तः। उपनिषत् ततोहं तामपि तथैव। श्रमयभ्यर्थितवती। अथ तथ्या पृष्टास्मि। भद्रे किं कुर्मासीत ततो मया तदेवोक्तं। यस्मा
द्विश्वमित्यादि पठितं। पुरुषस्ततः। २। उपनिषत्। ततो मीमांसया पार्श्ववर्त्तिनां मुखमालोक्याभिहितं अस्येवास्माकमस्याः लो
कांतरफलोपभोगयोग्यपुरुषोपनयनेनोपयोगः। तद्धियतमेषा कर्म्मोपयुक्ता। तत्र तेषामंतेवासिनां मध्ये केनाप्यंतेवासिनैतदनु
मोदितमेव॥ अपरेण तु प्रसिद्धप्रतिष्ठितेन मीमांसाहृदयाधिदेवतेन कुमारिलस्वामिना प्रोक्तं देवि नैयं कर्मोपयुक्तं पुरुषमुपनय
ति। किं तु। अकर्त्तारमभोक्तारमीश्वरं। नचासावीश्वरः कर्म्मसूपयुज्यते। ततोपरेणोक्तम्। अथ किं लोकिकात्पुरुषादन्य ईश्व
रोनामास्ति। ततस्तेन विहस्य पुनरुक्तम् अस्ति॥
तदाह। देवीति। उपनयति प्रतिपादयति। तर्हि कीदृशं प्रतिपादयतीत्याह किंत्विति। ननु अकर्त्ता अभोक्ता चैव सिध्यतां का हानिस्तत्राह। नचासावि
ति। नच कर्त्तुरभोक्तुरीश्वरस्य कर्मोपयोगो बाधकाभावात् तादृशस्यापि कर्म्मोपयोगिता स्विदित्याशंक्याह ततोपरेणेति। अपरेणाभिमां
सकैकदेशमतावलंबिना। किमुक्तमित्याह अथेति लोकिकात् लोकप्रसिद्धात् पुरुषात् जीवात् अन्यो नाम ईश्वरः किमस्ति नास्तीत्य
र्थः। तेन कुमारिलस्वामिना जीवादन्य ईश्वरो नास्तीति श्रुत्वा विहस्येत्युक्तम्। किमुक्तं तदाह। अस्तीति जीवादन्य ईश्वरोस्तीत्यर्थः॥

63

तदेवाह। तथाहि। एक इति। एक ईश्वरः जगतां चेष्टितानि कर्माणि पश्यति विश्वसाक्षित्वादित्यर्थः। तु पुनरन्यो जीवः मोहांधधीर्मोहावृतज्ञानः त
थोक्तं गीतायां॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतव इति। एको जीवः कर्मफलानि पुत्रपश्वादीनि वांछति कामयते पुनरन्य ईश्वरः तानि
कर्म्माणि अर्थिने अभिलाषवते ददाति। एको जीवः कर्म्मसु ज्योतिष्टोमादिषु शिष्यते नियोज्यते। आज्ञाप्यत इति यावत्। अपरो देव ईश्व
रः तनुभृतां प्राणिनां शास्तेव एवं जीवाद्भिन्नलक्षण ईश्वरः लौकिकपुरुषादन्यो नेति कथं संभावनापि त्याह निःसंग इति। निःसंगः संगरहितः।
असंगो ह्ययं पुरुष इति श्रुतेः। पुरुषः पूरणात्पूर्णार्थत्वाद्वा पुरुषः परमात्मा क्रियासु कर्मसु कर्त्ता इति कथं चित्संभाव्यते न कथं चित्संभावयितुम
तथाहि। एकः पश्यति चेष्टितानि जगतामन्यस्तु मोहांधधीरेकः कर्मफलानि वांछति ददात्यन्यस्तु तान्यर्थिने। एकः कर्मसु शिष्यते तनु
भृतां शास्तेव देवोपरो निःसंगः पुरुषः क्रियासु स कथं कर्त्तेति संभाव्यतो राजा सहर्षं। साधु साधु कुमारि लस्वामिन् साधुप्रज्ञोस्या
युष्मान् द्वौ तौ सुपर्णौ सयुजौ सखायौ समानं वृक्षं परिषस्वजाते। एकस्तयोः पिप्पलमत्ति पक्वमन्यस्त्वनश्नन्नभिचाकशीति। पु
रुषस्तत स्ततः २। उपनिषत् ततोहं मीमांसा मनिमंत्र्यप्रस्थिता। पुरुषस्ततस्ततः॥ उपनिषत्। ततो मया बहुभिः शिष्यैरुपास्यमानाः इ
पि शक्यरत्यर्थः। राजा विवेकः। साधुप्रज्ञोसि उत्कृष्टबुद्धिरसि। स्वोक्तेर्थे संमतित्वेनार्थतः श्रुतिमवतारयति। द्वौतावितिः। द्वौ प्रसिद्धौ सुप
र्णौ सुष्टु पर्णगतिर्ययोस्तौ। पर्णगतौ सहायेन पत्रतां गरुड इति विश्वः। अव्याहतज्ञानावित्यर्थः सयुजौ सहयोगवंतौ सहायौ परस्परा
नुकूलौ। द्वौ जीवात्मपरमात्मानौ समानं एकं वृक्षं शरीरं परिषस्वजातः आलिंगयतः। स्वीकुर्वत इति यावत्। अनयोः कार्यभेदमाह। त
योर्मध्ये एको जीवः पक्वं पिप्पलं कर्मफलं अत्ति भुंक्ते। अन्य ईश्वरः अनश्नन् अभुंजानः अभिचाकशीति साक्षित्वेन पश्यतीत्यर्थः। उपास्य

कैविविद्याभव काकैतः।।

मनासैव्याख्याताः।।

न्यायविद्याः पातंजलन्यायकणादसांख्यनिर्मिताः शास्त्ररचनाः तासां मध्ये पातंजलनिर्मितां विद्यां प्रतिपादयति। काचिदिति। काचित् पातंज
लिनिर्मिता। विश्वस्याद्यो विशेषो जगतः क्लेशाद्यसंस्पृष्टत्वादितत्कल्पनापरा तत्प्रतिपादनपरेत्यर्थः। आत्मा निर्लेपः क्लेशैरपरामृष्टः अक
र्ताभोक्तेत्येवमादिकल्पयंति पातंजलाः। उक्तंच। उदयनाचार्यैः क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय संप्रदायप्रवर्त्त
कोनुग्राहकश्चेति। काचिद्विश्वविशेषकल्पनपरेति पाठे द्वित्वाद्युत्पत्तिविनाशक्षणगणनारूपाये विशेषास्तत्कल्पनपरा तत्प्रतिपादनपरा
64 अक्षपादमुनिप्रणीता विद्यापरा गौतमप्रणीता विद्या। न्यायैः नीयते प्राप्यते विवक्षितोर्थो यैस्ते न्यायाः पंचावयवानुमानवाक्यानि तैः वा
दः तत्त्वबुभुत्सुकथा छलमर्थांतरेण प्रयुक्तस्य शब्दस्यार्थांतरवर्णनं। जातिरसदुत्तरं निग्रहः पराहंकारनिराकरणं मन्ये यैस्तत्प्रधानैर्न्यायै

काचिद्विश्वविशेषकल्पनपरा न्यायैः परातन्वती वादं सच्छलजातिनिग्रहमयैर्जल्पं वितंडामपि। अन्या तु प्रकृतिं विभज्य
पुरुषस्योदाहरंती भिदां तत्त्वानां गणनापरा महदहंकारादिसर्गक्रमैः॥ ॥

रिति त्रिष्वपि संबंधनीयम्। जल्पं विजिगीषुकथां वितंडामपि परपक्षदूषणावसानां कथामपि न्यायैस्तैरुक्तैस्तन्वती विस्तारयंती। अन्या
सांख्यनिर्मिता विद्या प्रकृतिं गुणत्रयसामान्यावस्थां जगत्कारणभूतां विभज्य पृथक्कृत्य पुरुषस्य आत्मनो भिदां भेदं उदाहरंती कथयंती म
यावलोकिते तिपूर्वपंक्तिकास्थेनान्वयस्त्रिष्वपि योजनीयः कीदृशी सांख्यविद्या महदहंकारादीनां सर्गः सृष्टिस्तत्क्रमैः तत्त्वानां पंचविं
शतितत्त्वानां गणना संख्या तस्यां परा सावधाना प्रकृतेर्महान् महतोहंकारो हंकारात् पंचतन्मात्राणि एवं गणनापरेत्यर्थः। एतावता सांख्यपा
तंजलन्यायवैशेषिकशास्त्राणां क्षणपातत्वादिगणनयैवायुः पर्यवसाना तु रूपार्थोपयोगित्वाभावादनादरणीयत्वं तेषामिति भावः॥

तथैवाहमिति। मीमांसामिवेत्यर्थः। ताः विद्याः प्रतिसमुपस्थिता गता। अनुयुक्तया किं ते कार्य्यमिति पृष्टया। कर्म्मेदाहृतं कार्य्यमुक्तम्। किं तदित्याह। यस्मादिति। सप्रकाशोपहासं स्वप्रकाशोपहाससहितं यथा स्यात्तथेत्यर्थः। सोपहासमुक्तिं प्रकटयति। आः वाचालेति। आः इति कोपे। वाचाले अनुयुक्ते भाववाशीले। परमाणुभ्यः चतुर्विधेभ्यः विश्वं जगत् उत्पद्यते तत एवोपादानीभूता इत्यर्थः। ईश्वरः कर्तृत्वान्निमित्तं कुलालवदिति भावः। अन्यथा दूषणपरः सरमेव मुनेरितमित्याह। अन्यथेति। आः पापे ब्रह्मोपादानवादिति। ब्रह्मैवोपादानमिति मन्वाना यथा घटशरावादे मृदुपादानकत्वान्मद्विकारत्वं तथा ब्रह्मण उपादानत्वे विकारित्वं विकारित्वान्नश्वरत्वमिति वदतीना पत्र पसे रतिता प्रत्यर्थः। सा
पुरुषस्ततस्ततः। उपनिषत्। तथैवाहं ताः समुपस्थिता। ता मिश्वानुयुक्तया तेदवकर्म्मेदाहृतम्। यस्माद्विश्वमित्यादि। ततस्तासिः सप्रकाशोपहासमुक्तं। आः वाचाले परमाणुभ्यो विश्वमुत्पद्यते। अन्यथा तु सक्रोधमुक्तम्। आः पापे कथमीश्वरमेवं विकारिणं कृत्वा विनाशधर्म्मिणमुपपादयसि। ननु रे प्रधानाद्विश्वोत्पत्तिः। राजा अहो दुर्म्मतयः सर्वविद्याः एतदपि न जानन्ति सर्वं प्रमेयजातं घटादिवत्कार्य्यमिति परमाणुप्रधानोपादानकारणमप्युपेक्षणीयमेवेति॥
रव्य विषये दमुत्तरमभाषीत्याह नन्विति। रे इति धिक्संबोधने। प्रधानात् प्रकृतेरेव उपादानाच्छिदवच्छिन्नात् विश्वोत्पत्तिः पुरुषस्य तु पुष्करपलाशवन्निर्लेपत्वादिति भावः। उक्तं च। मूलप्रकृतिरविकृतिर्म्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न्न विकृतिः पुरुषरति। अनेककुतर्क्कोपप्लुते अवश्यापेक्षणीयो विवेक इत्याह। राजेति। राजा विवेकः। दुर्मतित्वमुपपादयति। एतदपीति। परमाणव श्च प्रधानं च योरुपादानकारणत्वं समवायिकारणत्वं सर्वं प्रमेयं प्रमाविषयः पक्षः उत्पद्यते। कार्य्यत्वाद्घटवत् यन्नैवं यथा आत्मेत्यन्वयव्यतिरेकिणा परमाणुप्रधानादीनामुत्पत्तिमत्वे भावकार्य्यत्वात्सोपादानत्वं वाच्यं उपादानगवेषणायामनवस्थाभानादात्मैवोपादानं। न च विकारित्वापत्तिरिति वाच्यं अधिष्ठानत्वादित्यवगंतव्यं विस्तारः शास्त्राज्ज्ञातव्यः॥

एतदेवोपपादयति। तथाहि। अं०भ० इति। एतत्परिदृश्यमानं जगत्कार्यं अत एव असत्यं मिथ्या अनिर्वचनीयमित्यर्थः। कार्यहेतुत्वमाह। मेयमिति ज्ञा
नगोचरमित्यर्थः। यतः ज्ञानविषय अतः कार्यमित्यर्थः। तस्मिन्नर्थे दृष्टांतः। अं०भ० शीतकरः जलचंद्रः अंतरिक्षनगरं गंधर्वनगरं स्वप्नो लोक इति
प्रसिद्धः। इंद्रजालं मंत्रादिना अन्यथा विद्यमानस्यान्यथाप्रतीत्युपादानं। आदिपदादन्ये भ्रमाः पीतशंखादिबुद्धयः। तद्वत् यथा जलचंद्रादयो
मेयत्वात् कार्यत्वादनिर्वचनीयाः एवं जगदिति ध्वनितं। जगतः कार्यत्वमुपपादयति। उदयउत्पत्तिः ध्वंसो विनाशः आदिपदात् वृध्यपचयौ तद्युक्तं।
जगतो जउत्वा कार्यत्वादनिर्वचनीयाः एवं जगदिति ध्वनितं। जगतः कार्यत्वे दस्वप्रकाशतया ज्ञानविषयत्वं आत्मनस्तु स्वप्रकाशतया ज्ञानवि न५
षयत्वमितिभावः। ननु अनित्यत्वेपि जगतः न कदाचिदनीदृशं जगदित्युक्तेः जगत एवं रूपेणैव सर्वदा सत्वात् कथं मुक्तिरित्याशंक्याह। स्वात्मावबो
तथाहि। अं०भ० शीतकरांतरिक्षनगरस्वप्नेंद्रजालादिवत्कार्यं मेयमसत्यमेतदुदयध्वंसादियुक्तं जगत्। शुक्तौ रूप्यमिव स्रजीव भुज
गः स्वात्मावबोधे हरावज्ञातप्रभवत्यथास्तमपैति तत्त्वावबोधोदयात्॥ विकारशंका तु मुग्धवधू विलसितमिव॥ ॥
धेति। स्वात्मावबोधे स्वप्रकाशे हरौ हरत्यज्ञानं तत्कार्यमिति हरिः। परंब्रह्म तस्मिन् अज्ञाते सति जगत्प्रभवति उत्पद्यते। अथानंतरं तत्त्वावबोधो
दयात् तत्त्वावबोधस्य अद्वितीयब्रह्मसाक्षात्कारस्य उदयात् उत्पत्तेः जगदस्तमयते प्रलीयते। उभयत्र दृष्टांतः। शुक्तौ रूप्यमिव। स्रजि मालायां भुजगः सर्प इव यथा शुक्तिमालयोरज्ञाने रजतसर्पावुत्पद्यते। तयोश्च तत्त्वावबोधादुभयं विलीयते। एवमात्माज्ञानाज्जगद्विवर्त्तते
तज्ज्ञानाद्विलीयत इत्यर्थः। न कदाचिदित्युक्तिस्तु जगतः बहुकालावस्थायित्वेनोपपद्यते। अन्यथा श्रुतिविरोधादिति भावः। यातंजल
पूर्वपक्षमधिक्षिपति। विकारशंकात्विति। मुग्धवधूयामेरस्त्री तस्याः विकृत्योमानसो विकारः तस्य विलसितमिव चेष्टितमिव। विका
रशंका पृथक्त्वमपि नास्ति असत्वाद्दोष्पत इति भावः। यद्वा मुग्धा अतिसुंदरी मुग्धासुंदरमूढयोरित्यभिधानात् सो दर्प्पच विवेकविज्ञानाभ्यां
तथा विवेकज्ञानवत्या वाङ्मयो विवेकः ब्रह्माद्वैतसाक्षात्कारः तस्य विलसितं प्रकाशस्तमिवेत्यर्थः। स्वात्मसाक्षात्कारे शंकासंभावनात्यंतप्र [illegible]॥६॥

विकाराभावं प्रकटयति। तथाहि शांतमिति। शांतं अविकारि ज्योतिः प्रकाशं तदनिरपेक्षं निःकलं निरंशं निर्म्मलम ज्ञानशून्यं च। अनुदितः नउदितः
उत्पन्नः न अस्तः अनष्टः अत एव निःसीमः प्रकाशस्तद्रूपं एतैः विशेषणैः सर्वथा विकारयोग्यतापि नास्तीति सूचितं। ईदृशं विश्वोत्पत्तौ विकृतिं वि
कारं कथं व्रजति प्राप्नोति न कथमपीत्यर्थः। अनुमर्थं लोकसिद्धदृष्टांतेन निश्चिनोति। शश्वदिति। शश्वन्निरंतरं नीलोत्पलवत् रक्तकांतिर्व्याप्तसां
तास्तासामंबुनाहामेघास्तेषामावलीनां पंक्तीनां प्रादुर्भावे सति उत्पत्तौ सत्यां नभस आकाशस्य कीदृशो वा कीदृशोपि विकारो भवति अपितु
तथाहि। शांतं ज्योतिः कथमनुदितानस्तनित्यप्रकाशं विश्वोत्पत्तौ व्रजति विकृतिं निष्कलं निर्मलं च। शश्वन्नीलोत्पलदलरुचामंबुवा
हावलीनां प्रादुर्भावे भवति नभसः कीदृशो वा विकारः। पुरुषः साधु साधु। प्रीणाति संममायं प्रज्ञावतो विमर्शः। उपनिषदं प्रति तरं। तर
उपनिषत् ततस्ताभिः सर्वाभिरेवकुद्धाभिरुक्तं अहो विश्वविलयेन मुक्तिमेषा वदती नास्तिकपथं प्रस्थिता निगृह्यतामिति। ततः
सरंभं मां निगृहीतुं प्रधाविताः सर्वाः पुरुषः सत्रासं ततस्ततः। उपनिषत्। ततोहं सत्वरतरं परिक्रम्य दंडकारण्यं प्रविष्टा। ततो
मंदरशैलोपकल्पितस्य मधुसूदनायतनस्य नातिदूरे। बाह्वोर्भग्नादलितमण्याः श्रोण्यायः कंकणानां चूर्णरत्नग्रहनिकृति
भिर्दूर्षितः केशपाशः शरत्याघवस्थानमम संजाता। पुरुषस्ततस्ततः। उपनिषत्। ततो देवायतनान्निर्गत्य गदापाणिभिः पुरु
षैरतिनिर्दयताड्यमानास्ता दिगतमतिक्रांताः सर्व्वाः॥

नेत्यर्थः। प्रीणयति विमर्शो विचारः। नास्तिकपथं वेदनिंदकमार्गं निगृह्यतां बध्यतां। ससंरंभं सकोपं। परिक्रम्य निर्गत्य मंदरशैल
पर्वतस्य उपसमीपे कल्पितस्य निर्मितस्य नातिदूरे निकटे बाहुभंगाद्यवस्थाममसंजाते त्यग्रेतनेनान्वयः। बाह्वोरित्येप्रथमं व्याख्या
तः। देवायतनाद्देवतागृहात् पुरुषैर्गदापाणिभिस्ताड्यमानाः अतिक्रांताः अतिक्रम्य उल्लंघ्य दिगंतं गताः विद्याः सर्व्वाः॥ ॥

प्र॰टी॰ अतिक्रामतः अभिभवतः। स्वाध्यस्तं विश्वं तादात्म्यसंबंधात्साक्षादीक्षत इति विश्वसाक्षी। क्षमते सोढुं शक्नोतीत्यर्थः। प्रकृतमस्य वाह्योर्भ
६६ मेत्यस्य पदद्वयस्यान्यदुत्तरार्द्धं पठति छिन्नेति। मुक्तावलिः मुक्ताहारः त्रोटितः। अंगात् स्रस्तं अधः पतितं दुकूलं अपहृत्य बलाद्गृहीतं। अ
थानंतरं अहं भीता सती गीताश्रमं प्रविष्टा कीदृशी अहं गलती स्खलती नूपुरे चरणभूषणे यस्याः सा। तत्र त्यादि। वत्सया गीतया उपवि
श्य मूलत्वाद्वत्सयेत्युक्तं। मातर्मा तरिति उक्त्वेति शेषः। मां परिरभ्य आलिंग्य अहमुपवेशितास्मीति योजना। विदितवृत्तांतया ज्ञातस
66 राजा। सहर्षभूः नरवल्लु भवती मतिक्रामतो भगवान्विश्वसाक्षी क्षमते। पुरुषस्तत स्ततः। उपभिषत्। छिन्नामुक्तावलि
रपहृतं स्रस्तमंगाद्दुकूलं भीता गीताश्रममथ गलन्नूपुराहं प्रविष्टा। तत्र च वत्सया गीतया मां तत्रागतामालोक्य संभ्रमं
मातर्मातरिति परिरभ्योपावेशितास्मि। विदितवृत्तांतया तया च। तथोक्तं। अंबनात्र खेदयितव्यं मनो ये खलु त्वामप्र
मापी कृत्य यथेष्टमसुरसत्वाः पंचरिष्यंति तेषामीश्वर एव शास्ता उक्तं च तेन भगवता ताननधिकृत्य। तथा च गीता। ता
नहं द्विषतः क्रूरान्संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिष्विति। पुरुषः सकौतुकं देवि त्वत्प्रसादा
त् ज्ञातु मिच्छामि कोयमीश्वरो नामेति॥ ६॥
माचारया। असुराणां दैत्यानां सत्ववन्मनो वत्सत्वं चेतो येषां ते निर्दयहृदया इत्यर्थः। प्रचरिष्यंति वर्त्तिष्यंते शास्ता दंडकर्त्ता। कुत्रोक्तमि
त्याह। तथा च गीतेति गीतायामित्यर्थः। उक्तमाह तानिति। अहं तान् अत एव नराधमान् तथा द्विषंतो द्वेषयुक्तान् अशुभान् पापिष्ठान्
संसारेषु आसुरीष्वेव योनिषु दैत्ययोनिषु अजस्रमनवरतं क्षिपामि तेषां कदापि संसारान्निस्तारो नास्तीति भावः॥ ६॥ ॥ राम॰ ६६

सकोपमिवेत्यत्र विलोक्य वदतीति शेषः। बहिर्मुखं प्रतिकथं आत्मस्वरूपं वर्णयितुं शक्यत इत्याह। कोनामेति। को नाम जनः आत्मानं स्वरू
पमजानं तं प्रत्युत्तरं दास्यति न कोपीत्यर्थः। अंधमिवेति दृष्टांतः। केन चिदंधेन भगत्स्वरूपं लोचनगोचरी करिष्यामीति पृष्टे यथा मंधेन
कोप्युत्तरयतितथेत्यर्थः। स्वस्वरूपाभेदमुपपादयति। असाविति। असौ अपरोक्षः पुमान्यस्त्साक्षादपरोक्षादिति श्रुतेः। त्वदन्यो न
त्वत्तः अन्यः भिन्नो भवतीति शेषः। उदरमंतरं कुरुते अथ तस्य भयं भवतीति श्रुतेः। भवान् पुरुषोत्तमाद्द्वितात् परमात्मानः स्वप्रकाशात्
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इति श्रुतेः। परोन्यो न तत्त्वमसीति श्रुतेः। कीदृशः पुमान् सनातनः अविनाशी॥ ननु बाधितम

उपनिषत्। सकोपमिव। कोनात्मानयमजानं तं अंधमिवप्रत्युत्तरं दास्यति। पुरुषः सहर्षकथमहमात्मापुरुषः परमेश्वरः। उ
पनिषत्। एवमेतत्। तथाहि। असौ त्वदन्यो न सनातनः पुमान्भवान्नदेवासुरपोत्तमापरः। सएव भिन्नस्त्वमनादिमायया
द्विधेव बिंबं सलिले विवस्वतः॥

र्थं विदोपि कथं बोधयेत् सूर्यो यूपः यजमानः प्रस्तर इत्यादिवत्। किं चाप्रत्यक्षपरिगृह्यमाणो भेदः कथं स्वरूपाद्वैतं प्रतिपाद्यत इत्याशंक्य
भेदस्त्वन्यकृतो न वास्तव इत्याह। सएवेति। सएव भिन्न एव त्वं अनादिमायया अनाद्यविद्यया भिन्नः भेदं गतः। नन्वविद्यकेपि भेदेस
ति कथमहमीश्वरो भवेयं इत्याशंक्य मिथ्याभूतो भेदः पारमार्थिकमभेदं न विरोद्धुं शक्नोतीत्याह। सलिले जले विवस्वतः सूर्यस्य बिंब
मंडलं द्विधेव द्विप्रकारमिव तथोक्तं। एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचंद्रवदिति। अधिकं शा
स्त्रादवगंतव्यं इह विस्तरभयाद्विरमामः॥

तत्त्वमस्यादिवाक्यादपि जायमाने ज्ञाने विचारं विना अनवधारणमेवेत्याह। पुरुषेति। असंभावित एवार्थ इत्याह। अवच्छिन्नस्येति। इयं दे
वी उपनिषत् अवच्छिन्नस्य शरीरावच्छिन्नस्य परिच्छिन्नस्येति यावत् भिन्नस्य भेदबुध्या गृहीतस्य जरामरणे धर्मौ यस्य एतादृशस्य म
म नित्यज्ञानस्वरूपतां ब्रवीति निरूपयति इदं असंभावितमिवेति लक्षत इत्यर्थः। पदार्थानवज्ञानात् तत्त्वंपदार्थयोः सम्यगनवबो

पुरुषः। विवेकं प्रति भगवन्नुक्तमप्यर्थं भगवत्यानसम्यगवधारयामि। अवच्छिन्नस्य जरामरणधर्मिणः। मम ब्र
वीति देवीयं सत्यानंदचिदात्मतां। विवेकः। पदार्थानवज्ञानाद्वाक्यार्थो नावगम्यते। आर्य्येणोक्तं तत्सत्यमेव। पु
रुषः। तदवबोधाय भवानुपायमाज्ञापयतु॥

धात् वाक्यार्थो नावगम्यत इति। उपनिषत्प्रतिपादिततत्त्वमस्यादिमाहावाक्यार्थस्य अखंडैकरसस्य जीवपराभेदस्यानिर्द्धार
णादित्यर्थः। तदवबोधाय वाक्यार्थज्ञानाय। भवान् विवेकः। आज्ञापयतु कथयतु॥ ॥ ॥

एषोऽस्मीति। चिदात्मनि तत्पदार्थे निष्कृष्टे ईश्वरचैतन्ये तत्त्वमर्थे त्वंपदार्थे निष्कृष्टजीवचैतन्ये परिज्ञाते सम्यग्बुद्धे सति पुनरनंतरं तत्त्वम
सीति वाक्यं श्रुत्वा तदात्मप्रभं स्वप्रकाशं ज्योतिः अन्तर्मनोवृत्तौ अखण्डवाक्यार्थरूपं समुद्योतते प्रकाशते। तथोक्तं छांदोग्ये तत्स
त्यं स आत्मा तत्त्वमसि श्वेतकेतो इति ज्योतिषो विशेषणानि अनंतं वस्तुतो देशतः कालतश्चेति त्रिविधपरिच्छेदशून्यं। बाधितं तिर

विवेकः अयमुच्यते। एषोऽस्मीति विविच्यनेतिपरितश्चित्तेन सार्द्धं कृते तत्त्वानां विलये चिदात्मनि परिज्ञाते त्वमर्थे पुनः।
श्रुत्वा तत्त्वमसीति बाधितभवध्वांतं तदात्मप्रभं शांतं ज्योतिरनंतमंतरुदितानंदं समुद्योतते ॥ ॥ ॥

स्कृतं भवः संसारस्तस्य ध्वांतं मूलकारणमज्ञानं येन तत्तथा शांतं निरुपद्रवं उदितानंदं अनस्तमितसुखस्वरूपं। तत्त्वं त्वंपदार्थशो
धनप्रकारमाह। कस्मिन्सति। एष अहंकारः न अस्मि इति चित्तेन सार्द्धं मनसा सह विविच्य प्रपञ्चं कृत्वा परितः सर्वेषामित्यर्थः।
सर्वेषां तत्त्वानां विलये विनाशे कृते सति अर्थाद्विवेकतः तत्त्वंपदार्थशोधनात् असंभावनादिनिवृत्तौ तत्त्वमसीत्यादिमहावा
क्यार्थावधारणं निश्चयरूपं भवतीति भावः॥

परिभावयति चिंतयति। श्रवणमनने निरूपिते इदानीं निदिध्यासनप्रवेशमाह। ततइति। नितरांगूढं गुप्तं यथास्यात्तथा विवेकेन सहउपनि
षत् अस्मदभिप्रायं बोधयितव्येति यो जनीयं गुप्ता अस्मदीय वार्त्ता उपनिषद्विवेकयोरग्रे कथनीयेत्यर्थः। किं बोधयितव्येत्याह।
त्वयाचेति। पुरुषे विवेके। जनांतिकं लोकसमक्षं मादिष्टमर्थमाह। यथेति। संकल्पयोनयः संकल्पो मानसो व्यापारः सएव योनिरु

पुरुषः॥ सानंदं श्रुतमर्थं परिभावयतीति। ततः प्रविशति निदिध्यासनं। आदिष्टोस्मि भगवत्या विष्णुभक्त्या यथा निगूढ
मस्मदभिप्रायमुपनिषद्विवेकेन सहबोधितव्यः। त्वयाच पुरुषे वस्तव्यमिति विलोक्य एषा देवी वेकपुरुषाभ्यां नातिदूरे
वर्त्ततेयावदुपसर्प्पामि। उपसृत्य। उपनिषदं प्रति। जनांतिकं। देव्या विष्णुभक्त्या समादिष्टं यथा संकल्पयोनयो देव
ता भवंति। मयाच समाधानेन विदितम्। यथा आपन्नसत्वा भवतीति॥

त्तिकारणं यासां ताः भवंति। संकल्पमात्रादेवोत्पत्तिर्न मैथुनेनेति भावः। ब्रह्मवा इदमग्र आसीदित्यारभ्य सर्व्वमभवदित्यंतेन संक
ल्पप्रभवत्वं दर्शितं वृहदारण्यके। त्वयाकथमेतत् ज्ञातमित्याह। मयेति। मयाच समाधानेन योगसामर्थ्यजन्यधानेनेत्यर्थः॥
आपन्नसत्वा स्वीकृतगर्भा। विवेकसंकल्पादेव गर्भाधानमिति भावः॥

क्रूरसत्वाक्रूराभिप्राया जगद्विनाशकत्वात्। प्रबोधचंद्रोदयश्च। तत्रेति। तत्र मनसि संकर्षण विद्यया योगेनाकर्षणरूपया विद्यया विद्यां आत्मा
साक्षात्काररूपां संक्रमयिष्यतीति योजना। श्रूयते हि संकर्षण विद्यया संकर्षणो देवकी जठरात् रोहिणी जठरं प्रापित इति श्रीमद्भागवते। श्रवण
मनने निरूपिते इत्युक्तं तत्र श्रवणं नामाद्वैते ब्रह्मणि उपनिषदां तात्पर्यावधारणं मननं नाम युक्तिभिरनुचिंतनं तेन अर्थान्निरूपितो निदिध्या
सनं नाम विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणं तदप्यर्था देवेति ज्ञातव्यम्॥ विद्याया अंतःकरणवृत्तिरूपत्वान्मनसि
संक्रमणं युक्तमिति भावः। ध्यानं नाटयतीति। निदिध्यासनं विचारविशेषात्मकं सच विचारविशेषो ध्यानात्मा ध्यानरूपं निदिध्यासनं पुरुषं प्र

तत्र क्रूरसत्त्व विद्या नाम कन्या त्वदुदरे वर्त्तते प्रबोधचंद्रोदयश्च। तत्र विद्यां संकर्षण विद्यया मनसि संक्रामयिष्यसि। प्रबोधचंद्र
श्च पुरुषे सम्यक् सविवेके न सह मत्सकाशमागमिष्यसीति उपनिषत्। यदादिशति देवीति निवेकमादाय निष्क्रांता। निदिध्या
सनं पुरुषं विशति। पुरुषो ध्यानं नाटयति। नेपथ्ये। आश्चर्यमाश्चर्यम्। उद्दामद्युतिदामभिस्तडिदिव प्रद्योतयंती दिशः प्रत्यक्ष
स्फुटदुत्कटास्थि मनसो निर्भिद्य वक्षःस्थलं। कन्येयं सहसा समं परिकरैर्मोहं ग्रसंती भजत्येतद्ध्वानमुपैति चैव पुरुषं श्रीमान्प्रबो

विश्य नाटयति विस्तारयति। उद्दामेति। इयं कन्या विद्यारूपा। सहसा अकस्मादंतर्द्धानं भजति तिरोधानं प्राप्नोति। कीदृशी कन्या। मनसो व
क्षःस्थलं निर्भिद्य निर्गता इति शेषः। उद्दामा उत्कटा द्युतय एव दामानि ताभिः तडिदिव दिशः द्योतयंती प्रकाशयंती। कीदृशं वक्षःस्थलं प्र
त्यक्षं समक्षं। स्फुटंति भिद्यंते उत्कटानि स्थूलानि अस्थीनि यस्मिन् तत्। पुनः कीदृशी कन्या परिकरैः सेवकैः कामादिभिः समं सार्द्धं मोहं
ग्रसंती लिहंती। उत्पन्नमात्र विद्या मोहादि सर्वं विनाश्य स्वयमपि नश्यतीति भावः। च पुनः एषः श्रीमान्प्रबोधोदयो निरतिशय ब्रह्मप्रकाशः
एकं पुरुषं क्षेत्रज्ञं उपैति आविर्भवति चकारो भजउपैत्योः समानकालार्थः॥

किं व्याप्तमिति। सोहं प्रबोधोदयोस्मि। सकः यस्मिन्प्रबोधेऽभ्युदिते सति त्रैलोक्यं जगदेवमनेन प्रकारेण वितर्कपदवीं विषयं न समारोहति न प्राप्नोति कीदृशं
त्रैलोक्यं सहजप्रकाशेन स्वाभाविकप्रकाशेन दलितं विमर्शितं। तर्कमेव प्रकटयति। किं व्याप्तं किमाक्रांतं। किमपोहितं दूरीकृतं। किमुद्धृतं नीतं किं
वा किमुत्समुत्सारितं। अपसारितं। किं नु स्यूतमुत्स्यूतं च वस्त्रवत्समीकृतं। किमिदं नु विलापितं। स्त्यानघृतवद्द्रवीकृतं किंचिदस्तीति शेषः। वा
इत्यथवा किंचन किमपि अस्ति नास्तीत्यर्थः। तर्कागोचरत्वादात्मानास्त्येवेति न मंतव्यं नास्तिका अपि क्षणिकं शरीरपरिमाणमणीयांसं ईश्व
रं व्यापकमात्मानं वर्णयंति सकः अवस्थात्रयसाक्षी नित्यः व्यापकः निर्गुणः सर्वत्र पूर्णः प्रकाशांतरनिरपेक्षः सर्वांतरो नास्तीति वक्तुं शक्य

ततः प्रविशति प्रबोधोदयः। प्रबोधोदयः। किं व्याप्तं किमपोहितं किमुद्धृतं किं नासमुत्सारितं स्यूतं किं नु विलापितं नु किमिदं किंचिन्न
रा किंचन। यस्मिन्नभ्युदिते वितर्कपदवीं नैवं समारोहति त्रैलोक्यं सहजप्रकाशदलितं सोहं प्रबोधोदयः॥ परिक्रम्य। पुरुषः। याव
दुपसर्पामि। उपसृत्य भगवन्प्रबोधचंद्रोदयोभिवादये। पुरुषः साह्लादं एहि वत्स परिष्वजस्व मां। तथा करोति। पुरुषः सानंदं
अहो विघटितं तिमिरपटलं प्रभातं संजातम्॥ ॥

ते तस्माद्दस्सनुमंवरूपः साक्षी सोहं प्रबोधचंद्रोदयोस्मीत्युक्तमन्वयावसरे। ननु किमित्यादि वितर्कार्थः। आत्मप्रबोधे सम्यगुदिते सांसारि
कत्रैलोक्यविषयानेकतर्ककर्कशपरिभावना विलीयते। अन्यथा तर्कदुर्गमप्राकारविकारपरिखाभिरावर्तोनकं चनगपायतीति भा
वः। निर्विकल्पकरूपतया विद्याप्रबोधयोराकारो निरूपयितुं न शक्यत इति तयोरनस्थेवपात्रद्वारा निरूपितेति ज्ञेयं यथायोग्यसं
भावनया। पुरुषे प्रबोधयस्मजातत्वाद्वत्स इति संबोधनं। विघटितं तिमिरपटलं तिमिरमज्ञानमेव पटलं आच्छादकं विघटितं विनाशि
तं यस्मिन्नेवं भूतं प्रभातं प्रभातमिव संजातं। संसाररात्रिअपगमात्प्रबोधप्रातःक्षणोमत इति उक्तत्वादिति भावः॥ ॥ ॥ राम॰ ६९

तदेवदर्शयति। तथाहि। मोहेति। कोपि विशिष्टाशक्यवचनः तुषारा हिमाः रश्मयो यस्य बोधश्चासौ तुषाररश्मिश्च तादृशः प्रबोधचंद्र इत्यर्थः
अजनि प्रादुर्भूतः। येन बोधचंद्रेण कृत्वा वेदबोधितफलावश्यंभाव निश्चयः श्रद्धा। दृश्यमानात्मादर्शिरात्मेत्यादि विवेकमतिः शांतिरिंद्रियनिय
मः यमनियमादिकं व्याख्यातं इदं विश्वात्मकं जगद्रूपं स एषोहं विष्णुरिति स्फुरति प्रकाशते। किं कृत्वा मोहः संसारहेतुरज्ञानं तदेवांधकारं आ
वरकं अवधूय निरस्य। विकल्पो भ्रम एव निद्रा तामुन्मथ्य त्यक्त्वा। मथादिकेनेति पाठे। यमादिकेन बोधतुषाररश्मिरजनीत्यन्वयः। उत्पन्नब्रह्म
तथाहि। मोहांधकारमवधूय विकल्पनिद्रामुन्मथ्य कोप्यजनि बोधतुषाररश्मिः। श्रद्धाविवेकमतिशांतियमादिकेन विश्वात्मकं
स्फुरति विष्णुरहं स एवः। सर्वथा कृतकृत्योस्मि भगवत्या विष्णुभक्तेः प्रसादात्। सोहमिदानीं। संगं नकेन चिदुपेत्य क्किमप्यपछंग
छेनतर्कितफलं विदिशं दिशं वा। शांतोव्यपेतभयशोकंषाय मोहः सायंगृहो मुनिरहं भवितास्मि सद्यः। ततः प्रविशति विष्णुभ
क्तिः। विष्णुभक्तिः सहर्षमुपसृत्य चिरपाख त्वस्माकं संपन्नाः सर्वे मनोरथाः॥
साक्षात्कारस्य वर्त्तमानप्रारब्धस्यावस्थामाह। संगं नकेनचिदिति। सोयं सायंगृहः सायंकालेन विशिष्टं स्थानमेव गृहं यस्य स सायंगृहः॥ मुनिर्म
ननशीलः सद्यो भविता इदानीं भविष्यामीत्यर्थः। संगं यदृच्छालाभेन विवेकेन चिदपि उपेत्य प्राप्य क्किमपि अपछंनपृष्ट्वा नप्रयोजनभावादिति
भावः। तथाहि दिशं प्राच्यादि विदिशमाग्नेयादिं नतर्कितं लक्षितं फलं प्रयोजनं यथास्यात्तथा गच्छन्परिभ्रमन्। शांतो रागद्वेषादिशून्यः व्यपे
ताः। भयं च शोकश्च कषायश्च प्रारब्धातिरिक्तकर्मफलभोगः मोहश्च यस्मात्तादृशः॥

प्रशांताराातिंनिर्द्दलितमोहं। भवतं। अतः परं अतोऽस्मात्परं उत्कृष्टं। अतः परमित्युक्तस्यार्थवदनुकूलितमर्थमाह। प्रशांतेति। विवेकः कृतकृ
त्यतां अगमत्। परिनिष्पन्नकार्य्योऽभूत्। कीदृशो विवेकः प्रशांतो ध्वस्तः अरातिर्मोहरूपः शत्रुर्येनसः। यद्वा प्रकर्षेण शांतः कामक्रोधादिः
अरिषड्वर्गो यस्य सः। विद्याप्रबोधोदयौ श्रीमत्या विष्णुभक्तेः प्रसादात् महामोहं ससैन्यं विनाश्य श्रीमता विवेकेन समुत्पादिता विति ध्वनितं।
मो नीरजाक्षि। कमलनयने सदानंदे नेपदे अविनाशिपरब्रह्मपदे जीवन्मुक्तिलक्षणे अहं निवेशितः। इतोऽन्यः पुरुषो नास्तीति भावः। मिर

ततः येन प्रशांताराातिं भवंतमालोकय साभि। पुरुषः। देव्याः विष्णुभक्तेः प्रसादात् किं नाम दुष्करमिति पादयोः पतति विष्णुभक्तिः पु
रुषमुपस्थापयति। उतिष्ठ वत्स किं ते भूयः प्रियमुपकरोमि पुरुषः। अतः परमपि किं प्रियमस्ति। यतः प्रशांतरतिरगमद्विवेकः
कृतकृत्यतां। नीरजस्के सदानंदे वंदे चाहं निवेशितः। तथाप्येतदस्तु। पर्जन्योऽस्मिन् जगति महतीं वृष्टिमिष्टां विधत्तां राजानः
क्ष्मां गलितविविधोपप्लवाः पालयंतु। तत्वोन्मेषोपहततमसस्त्वत्प्रसादान्महांतः संसाराब्धिं विषयममतांतंकपंकं तरंतु॥

जस्के सदानंदे इति पाठे निर्गतं रजः आवरणरूपं यस्मात्तस्मिन्निरावरणे पदे इत्यस्य विशेषणं नीरजस्कः इति सकलशास्त्ररहस्यं प्रबोधचं
द्रोदयाख्यनाटकच्छलेन आपाततः प्रदर्श्य स्थले स्थले पूर्वपक्षापरपक्षौ कृत्वा वेदांतसिद्धांतानपि प्रदर्श्य विवेकपुरःसरं कामक्रो
धादिपाखंडपराजयद्वारा सर्व्वानपि संसारनिराकरणपरिपंथिनः पराभूयांते वासिनमतिदयापात्रं सम्यगवबोध्य विष्णुभक्तिं प्रा
र्थयंतः॥

श्रीकृष्णमिश्राः ग्रंथांते आशीर्लक्षणं मंगलमाचरंति। तथाप्येतदस्त्वित्यादि पर्जन्य इति॥ पर्जन्यो जलपूर्णमेघः अस्मिन्जगति अस्यां
भूमौ महतीं इष्टां समये यावदपेक्षितां इष्टामिति पदेनातिवृष्टिं निवारयति विधत्तां करोतु। गलितो नष्टः उपप्लवो देशराज्यादुपद्रवो
भयं। ते राजानः क्ष्मां पृथिवीं पालयंतु। संसारिभ्य आशिषं दत्वा ज्ञानिनोपि ददाति महति। ज्ञानिनस्त्वत्प्रसादात्संसार एवाब्धिः समुद्र
स्तं तरंतु। कीदृशं समुद्रं विषयाः स्रगादयः ममता ममत्वाभिमानः आतंको भयं एतान्येव पंकः कर्दमो यस्मिन् तं। कीदृशाः महांतः त
त्वानां उन्मेषः साक्षात्कारस्तस्मादुपहतं विनाशितं तमः अज्ञानं येषां ते॥ विष्णुभक्तेः प्रसादात्सर्वं प्राप्यत इति भावः। अंकसमाप्तिं
द्योतयति॥ ॥ इति निष्क्रांताः सर्वे इति अंकः समाप्तौ सर्वेषां निष्क्रमणमित्यर्थः॥ इति श्रीमद्विनायकात्मजदीक्षितराम
दासविरचितप्रकाशाख्ये प्रबोधचंद्रोदयनाटकव्याख्याने जीवन्मुक्तिनिरूपणं नाम षष्ठोंकः॥ ॥ सप्राकृतं संस्कृतमत्र
किंचिद्व्याख्यायतामवर्णि किंचित्। तत्रापशुद्धं यदि किंचिदस्ति तच्छोधनीयं विबुधैर्न मूर्खैः॥ ॥ ॥ ॥छ॥

ग्रंथ ३११६

पत्रे ७१

प्रबोधचंद्रोद नाटक
३२१६